





Tracking:

| sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 15.10.2013 | Typing started on | H K Srinivasa Rao |
| 2 | 10.02.2014 | Typing Ended on | H K Srinivasa Rao |
| 3 | 02.03.2014 | First Proof Reading | H K Srinivasa Rao and Venugopal M S |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ"

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

**ग्रंथ ऋण: पूर्णप्रज्ञसंशोदन प्रतिष्ठानदिंद प्रकाशितवाद प्रमाणसंग्रहः**

INDEX-HYPERLINK


कम्भालूरुपिन्नरहर्याचार्यरचितः प्रमाण सङ्ग्रहः ........ 10

॥ प्रमाणसङ्ग्रहः ॥ ........ 10

श्रीश्रीपादराजप्रणीतनवरत्नमालिकाव्याख्यानरूपः ........ 10

(मङ्गलाचरणम्) ........ 10

(श्रीश्रीपादराजप्रणीतपद्यम्) ........ 10

1. हरिः परतरः ........ 11

(हरेः सर्वोत्तमत्वे प्रमाणोदाहरणम्) ........ 11

(हर्यनुग्रहाभावे ब्रह्मादीनामपि क्लेशसन्ततिः) ........ 12

(रामकृष्णाद्यवतारेश्वपि विष्णोः नाज्ञानादि) ........ 13

(विष्णुः सर्वोत्तमः) ........ 13

(विष्ण्वनुग्रहादेव श्रीः सर्वसर्गशक्तिमती) ........ 13

(विष्णोरेव जगत्सृष्ट्यादि) ........ 14

(विकारः स्वतन्त्रता चेति कर्तृत्वं द्विविधम्) ........ 14

(ज्योतिषामपि तज्ज्योतिः) ........ 15

(सृष्ट्याद्यष्टकर्ता विष्णुः) ........ 15

(सृष्टेः प्राक् विष्णुरेवासीत् नान्ये) ........ 16

(विष्णुपूजार्थं कर्माणि कार्याणि) ........ 17

(सूर्य-सूर्यकयोरिव जीवब्रह्मणोरन्तरमस्ति) ........ 19

2. सत्यं जगत् ........ 19

(न विश्वं भ्रान्तिकल्पितम्) ........ 19

(पुराणाद्युक्ताः मोहकविषयाः) ........ 20

(विश्वसत्यत्वे प्रमाणोदारहणम्) ........ 21

(विश्वं मायिकमसत् इत्यादिप्रमाणानां हार्दम्) ........ 23

(अनित्यत्वविकारित्वादिना स्वप्नसाम्यं जगतः उच्यते) ........ 25

3. तत्त्वतो भेदः ........ 27

(जीवपरभेदे मानानि) ........ 27

(पुरुषोत्तमस्त्वेकः पुरुषा अनेके) ........ 29

(विष्ण्वेकनिष्ठाः महागुणाः) ........ 30

(विष्णोः सर्वावतारेषु गुणादिषु च न विभेदः। सर्वे पूर्णाः) ........ 31

(न प्राकृतो देहः विष्णोरस्ति) ........ 32

(चतुर्विधो विनाशः विष्णोः न भवति) ........ 33

(सकलदोषविदूरो विष्णुः) ........ 33

(विष्णुप्रसादात् रमादयस्तं किञ्चिज्जानन्ति) ........ 34

(विष्णुर्विशेषतः देवादिषु रूपविशेषैस्सन्निहितः) ........ 35

(किञ्चित्सादृश्यमात्रेण जीवेऽशत्वव्यवहारः) ........ 35

(जीवेषाधिर्द्विधा प्रोक्तः) ........ 36

(त्रिविधानन्त्यं विष्णोरेव) ........ 36

(प्रत्यक्ष-तिरोहितभेदेन द्विविधं वैभवं रूपम्) ........ 37

(सर्वज्ञोऽपि विष्णुः अज्ञजनमोहनायावरेभ्यः वरादिकमर्थयति) ........ 37

(पञ्चविधो भेदः न कदाचित् विनश्यति) ........ 37

(भेदज्ञानमेव मुक्तिनिदानम्) ........ 39

(भेदवक्ता हरेः प्रियः) ........ 39

(न मुक्तावपि भेदापगमः) ........ 41

(जीव-शरीरशब्दार्थकथनम्) ........ 41

(भेद सत्योऽप्यनादिश्च) ........ 42

(असदुपासकानां तम एव भवति) ........ 42

(ईशधर्माः न जीवेऽनुसन्धेयाः) ........ 44

(मोक्षधर्मवचनेन ऐक्यवादनिरसनम्) ........ 45

(छान्दोग्ये दृष्टान्तनवकेऽपि भेद एवोक्तः) ........ 46

(असुरस्वरूपम्) ....46

(पातकोपपातकादिनां स्वरूपं फलनिरूपणं च) ....47

(विष्णुपारम्यविदां महाफलम्) ....48

( 'सलिल एको द्रष्टा' इति श्रुत्यर्थः) ....49

(नेह नानेति श्रुत्यर्थः) ....50

(यत्र त्वस्य सर्वमात्मैवाभूत् इति श्रुत्यर्थः) ....51

(वाचारम्भणश्रुत्यर्थः) ....52

(इदं सर्वं यदयमात्मा इति श्रुत्यर्थः) ....53

(पुराणादिषु जगत् असत्यत्वानृतत्वाद्युक्तेस्तात्पर्यम्) ....54

(ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्यर्थः) ....58

(स्तब्धस्य श्वेतकेतोः भेद एव पित्रा उपदिष्टः) ....59

(एकमेवाद्वितीयमिति श्रुत्यर्थः) ....60

(यथोदकम् इति श्रुत्यर्थः) ....61

(विष्ण्वधीनं सर्वमिति यथार्थज्ञानमेवापृथग्ज्ञानम्) ....61

(वस्तुस्वरूपानुगुणमैक्यज्ञानमतथाभूतं भेदज्ञानम्) ....61

(निन्दितभेदज्ञान (अन्यथाज्ञान) स्वरूपम्) ....62

(पञ्चविधस्तत्वविप्लवो न कार्यः) ....62

('तत्त्वतो भेदः' इत्यस्योपसंहारः) ....63

(ब्रह्मादयः हरेरनुचरा इत्यत्र भागवतप्रमाणोदाहरणम्) ....63

(देवानां विष्णोरनुचरत्वे श्रुत्युदाहरणम्) ....64

(ब्रह्मादीनां हर्यनुग्राह्यत्वे स्मृतिसमाख्य) ....64

5. नीचोच्चभावं गताः ....66

(जीवानामणुत्वेन तारतम्याभावशङ्कापरिहारः) ....66

(जीवत्रैविद्यं स्वाभाविकम्) ....67

(जीवेषु पुंस्त्र्याद्या जातयः नित्याः) ....68

(मुक्तौ स्वाभाविकाः गुणाः व्यज्यन्ते संसारे पुनरौपाधिका अनुभूयन्ते) ....69

(त्रिविधजीवसद्भावे ब्रह्मदर्शनमेव मानम्) ....70

(देवानामसुरत्वम् असुराणां देवत्वं वा न भवति) ........ 70
(मुक्तियोग्येष्वधिकारित्रैविध्यम्) ........ 72
(आदिसृष्टौ पूर्वजाः सदा गुणाधिकाः) ........ 73
(जीवेश्वपि प्राण उत्तमः) ........ 73
(वायोर्जीवोत्तमत्वमवतारादिकं च सदानुसन्धेयम्) ........ 74
(देवानां दुःखमसुरावेशतः, सुखमपि दैत्यानां देवावेशात्) ........ 75
(देवेषु तारतम्यं विज्ञेयम्) ........ 75
(भक्तानां तारतम्यम्) ........ 75
(श्रिय आरभ्य मनुष्योत्तमपर्यन्तं गुणविशेषैर्विष्णुरूपास्यः) ........ 76
(योग्यतातिरेकेण पूजा दुःखदा) ........ 77
(विहितं कर्म अपरोक्षिभिरपि कार्यमेव) ........ 78
(भक्तानां नैव दुःखमभक्तानां सुखं न च ) ........ 80
(हरेस्त्यागोऽनेकविधः न कार्यः) ........ 82
(गुर्वनुग्रहादेव साधनजातं सफलम्) ........ 83
(सम्पूर्णगुरुलक्षणसम्पन्नः चतुर्मुख (मुख्यप्राण) एव) ........ 83
(विष्णोस्तद्गुणादीनां भेददर्शनं भेदाभेददर्शनं वा हानिकारकम्) ........ 85
(नीचोच्चता नापगच्छति) ........ 85
(पशु-वृक्ष-स्थावर-मनुष्योत्तमादिभेदेन स्थितेषु जीवसङ्घेषु नीचोच्चता स्वाभाविकी) ........ 86
(मुक्तेष्वानन्दतारतम्यं प्रमाणसिद्धम्) ........ 87
(देवेषु तारतम्यं यथाशास्त्रमनुसन्धेयम्) ........ 87
(योग्यताभेदेन मुक्तानां भूरादिलोकस्थितिः) ........ 88
(जीवन्मुक्तस्थितिः) ........ 89
(देवोत्तमानामुपदेशः विमुक्तिहेतुः) ........ 89
(स्वोत्तमवशता मुक्तावप्यस्ति) ........ 90
(मुक्तानां सर्वज्ञत्वं न भवति) ........ 90
(मुक्तवैभवनिरूपणम्) ........ 91
(साधनानुगुण्येन मुक्तौ फलाधिक्यम्) ........ 91

(सायुज्यभाजां परमात्मप्रवेशेऽपि स्वीय एव भोगः) ....92

(प्रायः मौक्तानन्दे वृद्धिह्रासौ न भवतः) ....93

6. मुक्तिर्नैजसुखानुभूतिः ....94

(मुक्तौ निर्विशेषचैतन्यमात्रमवतिष्ठत इति वादनिरासः) ....94

(न मुक्तौ ब्रह्मानन्दानुभवः) ....95

(सुखरूपस्यापि जीवस्य असदवस्त्वबिमानाद् दुःखम्) ....95

(परमाणुप्रदेशेऽपि सन्त्यनन्तता जीवराशयः) ....96

(मुक्ता अपि स्वेच्छया हरिमुपासते) ....97

7.अमला भक्तिश्च तत्साधनम् ....98

(ज्ञानान्मुक्तिरिति प्रमाणवचसां ज्ञानजन्यभक्त्या मुक्तिरित्यर्थः) ....98

(भक्तेराधिक्यान्मुक्तावानन्दाधिक्यम्) ....98

(भक्तिर्निरवधिका निर्दुष्टा च मुक्तिप्रदा) ....99

(श्रीसहित एव विष्णुरुपास्यः) ....102

(असदुपासना न कार्या) ....103

(अधिकारिभेदेन उपासनाभेदः) ....103

(पूर्णत्वविरोधिगुणाः नोपास्याः) ....104

8.अक्षादित्रितयं प्रमाणम् ....104

(प्रमाणविभागे वादिविप्रतिपत्तिनिरासः) ....104

(अनुमा कामचारिणी) ....105

(ऋगादयश्चत्वारः मूलरामायणं भारतं पञ्चरात्रं चेति प्रमाणानि) ....106

(वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना) ....106

(इतिहासपुराणाभ्यां वेदार्थः स्फुटो भवति) ....107

9.अखिलाम्नायैकवेद्यो हरिः ....108

(ब्रह्मशब्दावाच्यं न ) ....108

(स्वातन्त्र्यात् सर्वकर्तृत्वात् सर्वान्तर्यामितया विष्णोः सर्वशब्दाभिधेयता) ....109

(सर्वशब्दमुख्यवाच्यो विष्णुरेव) ....111

(ऋते नारायणादीनि स्वीयनामानि विष्णुरन्येषां प्रादात्) ....111

(स्त्रीवाचकशब्दा अपि विष्णौ प्रयुज्यन्ते) ....112
(अन्यत्र प्रसिद्धैः अन्यत्रैव प्रसिद्धशब्दैश्च विष्णुरेव वाच्यः) ....113
(ॐकारवाच्यो विष्णुः)....116
(केशव-ईश्वर-कर्मादिशब्दाः विष्णावेव)....117
(मोहजनकेषु विषयेष्वादरो न कार्यः)....118
(अप्रसिद्धगुणत्वाद् हरिरनामा) ....118
(विष्णोः भेदेऽपि तज्जातत्वादिना तदित्यभेदव्यपदेशः)....119
(भारतादिशास्त्रादेव विष्णुर्ज्ञेयः नान्यैर्दुरागमैः)....121
(वेदनित्यत्वमपौरुषेयत्वं च बहुप्रमाणसिद्धम्) ....122
(सर्वशब्दाभिधो विष्णुः) ....122
(अकारवाच्यः विष्णोरेकः) ....123
(वायोरसङ्कुचितसर्वशब्दवाच्यत्वं नास्ति) ....126
(ग्रन्थोपसंहारः)....127

# कम्भाल्रूरुपिन्नरहर्याचार्यरचितः प्रमाण सङ्ग्रहः

## ॥ प्रमाणसङ्ग्रहः ॥

## श्रीश्रीपादराजप्रणीतनवरत्नमालिकाव्याख्यानरूपः

### (मङ्गलाचरणम्)

नत्वा विष्णुं श्रिया युक्तं विरिञ्चाभवपूर्वकान् ।
व्यासादीन् विजयीन्द्रार्यान् कुर्वे मानस्य सङ्ग्रहम्॥

श्रीमन्मध्वमते विष्णुः परात्परः इतीरितः।
श्रीपादराजचरणैस्तत्र मानं प्रकाश्यते॥

ज्ञातव्यानामिहानन्त्याद् बुद्धेश्चाल्पत्वहेतुतः।
सङ्गृह्यन्ते केचिदत्र विषयाः सप्रमाणकाः।
कम्भाल्रूरुमहावंशसम्भवेन सुमेधसा।
प्रमाणानां सङ्ग्रहोऽयं कृतः केशवतुष्टये।

### (श्रीश्रीपादराजप्रणीतपद्यम्)

**श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो**
**भेदो जीवगणा हरेरनुचराः नीचोच्चभावं गताः।**
**मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्**
**ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥**

**अनेनानवद्यपद्येन श्रीमन्मध्वमताब्धौ नवरत्ननिभाः विषयाः नव प्रतिपादिताः पूर्वं लक्ष्मीनारायणमुनिभिः। तत्र क्रमेणानन्यथासिद्धप्रमाणानि लिख्यन्ते।**

# 1. हरिः परतरः

## (हरेः सर्वोत्तमत्वे प्रमाणोदाहरणम्)

‘भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥’ इति गीतायाम्(5-39)

‘सर्वदेववरत्वेन यो न जानाति केशवम्।
तस्य पुण्यानि मोघानि................म्॥’ इति सत्तत्त्वे

‘ऋषीन् राज्ञः तथारभ्य प्रतिभाभ्याधिकाक्रमात्।
यावद् ब्रह्मा ब्रह्मणस्तु प्रायो नाप्रतिभासितम्॥’भ.गी.ता.॥13-25॥

‘सत्यं सत्यं पुनः सत्यं शपथैश्चापि कोटिभिः।
विष्णुमाहात्म्यलेशस्य विभक्तस्य च कोटिधा ॥

पुनःश्चानन्तधा तस्य पुनश्चापि ह्यनन्तधा।
नैकांशसममाहात्म्याः श्रीशेषब्रह्मशङ्कराः॥’

**इति नारदीये। (गी.भा.2-24)**

‘नास्ति नारायणसमं न भूतं न भविष्यति।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम्॥
यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः॥’ इति च।

‘न त्वत्समोऽस्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव।’

(गीता. 11-43)

'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः।

विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विना विरावत्॥'

**गी.ता.उपोद्घाते**

'अनन्तगुणमाहात्म्यो निर्दोषो भगवान् हरिः।

न समो नाधिको वापि विद्यते यस्य कश्चन॥

**गी.ता.उपोद्घाते**

तत्समो ह्यधिको वापि नास्ति कश्चित्कदाचन।

एतेन सत्यवाक्येन तमेव प्रविशाम्यहम्॥'

**इति स्कान्दे ।** (**गी.भा**.3-34)

## (हर्यनुग्रहाभावे ब्रह्मादीनामपि क्लेशसन्ततिः)

'श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः।

तदैवाच्युत यान्त्येव यदैव त्वं पराङ्मुखः॥'

**इति च ।** (**ब्र.सू.भा**.1.1.1)

'सर्वेशो विष्णुरेवैको नान्योऽस्ति जगतः पतिः॥' इति च ।

'परो मात्रया तन्वा वृधान  न ते महित्वमन्वश्नुवन्ति'

(**ऋ** 7.99.1)

'रुद्रेण ध्यायते विष्णुर्विष्णुध्येयो न कश्चन॥'

**इति ब्रह्मवैवर्ते** ( **भा-ता**.4.3.23)

'विष्णुना देवता बद्धाः विष्णवे च बलिप्रदाः।

विष्णुरासां पतिर्नित्यं न विष्णोर्बन्धकः क्वचित् ॥'

**इति वामने।**(**भा.ता**-10.9428)

'त्वं मुक्तिदो बन्धदोऽतो मतो नः त्वं

ज्ञानदोऽज्ञानदश्चासि विष्णो' इत्युदारशाण्डिल्यश्रुतिः।

‘विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः।

हरस्याङ्गविशेषेषु देवाः सर्वेऽपि संश्रिताः॥’

**इति पाद्मे।(गी.ता.11.15)**

## (रामकृष्णाद्यवतारेश्वपि विष्णोः नाज्ञानादि)

‘

‘कास्याज्ञानं कुतो दुःखं प्रादुर्भावेष्वपि प्रभोः।

प्रादुर्भावश्चिदानन्दशरीरो राघवः स्वयम्।

स्तम्भाद्वा नरदेहाद्वा नैवास्य प्राकृता तनुः॥’

## (विष्णुः सर्वोत्तमः)

‘यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥’

इति गीतायाम्(15.18)

‘ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः।

लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः॥’

**इति परमश्रुतिः।** (वि.त.नि.द्वि.प.)

‘ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः।

सर्वे क्षरा अक्षरा तु श्रीरेका तत्परो हरिः

**॥इति स्कान्दे।**(वि.त.नि.द्वि.प.)

## (विष्ण्वनुग्रहादेव श्रीः सर्वसर्गशक्तिमती)

‘यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्’ (ऋ.10.125.5)

इत्युक्त्वा ‘मम योनिरप्स्वन्तः समुद्रे’ इत्युक्तत्वात् तत्परत्वं हरेः सिद्धम्।

'यमन्तः समुद्रे कवयो वयन्ति' 'एको नारायण आसीन्न ब्रह्मा नेशानो नाग्निषोमौ नेमे द्यावापृथिवी'

'यस्मात्परं नापरमस्ति किञ्चित् यस्मात् नाणीयो न ज्यायोऽस्ति कश्चित्'

'एतावतालं ननु सूचितेन गुणैरसाम्येऽनतिशायनेऽस्य।

हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः॥

अथापि यत्पादनखावसृष्टं जगद् विरञ्चोपहृतार्हणाम्भः।

सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः॥'

**इति भागवते ।** 1.18.30,31)

## (विष्णोरेव जगत्सृष्ट्यादि)

'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय॥'

**इति गीतायाम्**(7.6)

'एते त्रिपुरुषाः प्रोक्ताः सृष्टिस्थित्यन्तकारिणः।

निमित्तमात्रं तौ देवौ विष्णुः सर्वस्य कारणम्॥'

**इति स्कान्दे ।(भा.ता**.3.7.5)

'मत्स्यादिरूपी पालयति नृसिंहो रुद्रसंस्थितः।

विहापयेद्विरिञ्चस्थः सृजते विष्णुरव्ययः॥'

**इति वामने। (भा.ता**.3.10.43)

## (विकारः स्वतन्त्रता चेति कर्तृत्वं द्विविधम्)

'कर्तृत्वं द्विविधं प्रोक्तं विकारश्च स्वतन्त्रता।

विकारः प्रकृतेरेव विष्णोरेव स्वतन्त्रता॥'

**इति पैङ्गीश्रुतिः। (गी.ता**.3.5)

'यस्मात् स्वतन्त्रकर्तृत्वं विष्णोरेव न चान्यगम्।

तदधीनस्वतन्त्रत्वं स्वावरापेक्षयैव तु॥

जीवस्य विकृतिर्नाम कर्तृत्वं जडसंश्रयम्।
पुमान् दोग्धा च गौर्दोग्ध्री स्तनो दोग्धेतिवत् क्रमात्॥

**इति ब्रह्मतर्के** (**गी.ता**.3.37)

'हरिः स्वभावतः कर्ता सर्वमन्यत्तदीरितम्।
अतः सा कर्तृता तस्य न कदाचिद् विनश्यति॥

**इति पैङ्गीश्रुतिः**(**गी.ता**.5.1.4)

## (ज्योतिषामपि तज्जोतिः)

'यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम्॥'

**इति गीतायाम्।**(15.12)

## (सृष्ट्याद्यष्टकर्ता विष्णुः)

'सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः।
बन्धमोक्षौ च पुरुषाद् यस्मात्स हरिरेकराट्॥' इति स्कान्दे।
'स्रष्टा पाता च संहर्ता निखिलस्यैक एव तु।
वासुदेवः परः पुंसामितरेऽल्पस्य वा न वा॥' इति च।

(**ब्र.सू.भा**.1.2.2.9)

पुण्येन पुण्यं लोकं नयति पापेन पापं लोकम्।' इति च।
'एष ह्येव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते।
एष ह्येवासाधु कर्म कारयति यमधोन्निनीषते॥'

(**कौ.उ**.3.8.)(**ब्र.सू.भा**. 2.1.3.6)

'स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः।
स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते॥'

**इति स्कान्दे।** (**ब्र.सू.भा**.2.3.7.13)

'ततस्तु देवदेवेशः प्राणः प्राणेश्वरो हरिः।
न हरेरीशिता त्वन्यः स हि सर्वाधिको मतः॥'

**इति हरिवंशे।** (**भा.ता.**11.3.40)

'मनोगतांस्तु संस्कारान् स्वेच्छया परमेश्वरः।
प्रदर्शयति जीवाय स स्वप्न इति गीयते॥
यदन्यथात्वं जाग्रत्त्वं सा भ्रान्तिस्तत्र तत्कृता।
अनभिव्यक्तरूपत्वान्नान्यसाधनजं भवेत्॥

(**ब्र.सू.भा.**3.2.3)

'स्वप्नादिबुद्धिकर्ताच तिरस्कर्ता स एव च।
तदिच्छया यतो ह्यस्य बन्धमोक्षौ प्रतिष्ठितौ॥'

**इति कौर्मे** (**ब्र.सू.भा।**3.2.5)

'प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु।
परमः पुरुषो विष्णुस्तदन्यो नास्ति कश्चन॥'

**इति वाराहे।**(**ब्र.सू.भा.**3.2.9)

सलिल एको द्रष्टद्वैतो भवति।

## (सृष्टेः प्राक् विष्णुरेवासीत् नान्ये)

'सर्वसंहारकं विष्णुं देवीं जीवांस्तथैव च।
कालं त्रिगुणसाम्यं च कर्माणि प्राणमिन्द्रियम्॥
संस्कारं चैव वेदांश्च नर्ते किञ्चिल्लये त्वभूत्॥'

**इति ब्रह्मतर्के।**

'आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत्।
अस्तित्वात् भूतनामभ्यः सर्वजीवेभ्य एव च।
मुक्तेभ्योऽपि पृथक्त्वेन विष्णोः सर्वत्रगस्य च॥

ऐक्येन च स्वरूपाणां प्रादुर्भावादिकात्मनाम्।

तारतम्येन जीवानां भेदेनेव परस्परम्॥

जडेभ्यश्चैव जीवानां जडानां च परस्परम्।

तेभ्यो विष्णोस्तु सम्यक् तल्लक्षणज्ञानपूर्वकम्॥

ज्ञानं सात्विकमुद्दिष्टं यत् साक्षान्मुक्तिसाधनम्॥'

(गी.ता.18.20) इति पाद्मे

'अहङ्कारात्मको रुद्रः शुको द्वैपायनात्मजः॥' इति स्कान्दे।

'तस्मात् हरेरण्डमभूदण्डादपि चतुर्मुखः।

सविराण्णामकस्तस्मादधिको हरिरेव तु॥' इति गारुडे।

'पूर्णत्वादात्मशब्दोक्तः कश्चित्स च नरोत्तमः।

स तु नारायणो नान्यः स च सर्वेषु संस्थितः॥

तद्वशा इतरे सर्वे श्रीब्रह्मेशपुरःसराः॥' इति वाराहे।

## (विष्णुपूजार्थं कर्माणि कार्याणि)

'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवः॥' (18.46)

'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्॥' (3.35)

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।

मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥'(18.65)

'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।

निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥'

**इति गीतायाम्।** (11.55)

‘पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन्।
यदात्मनः सुनियतमानन्दोत्कर्षमाप्नुयात्।
यस्त्वेवात्मरतो मुक्तः कार्यं तस्यैव नास्ति हि।
तस्मात्कुर्वीत कर्माणीत्याह कृष्णोऽर्जुनं स्मयन्॥’ इति स्कान्दे।

‘एतान्यापि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥’ (भ.गी.18.6)

‘ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः सततं भवेत्।’
इति च।

‘सहैव कर्मणा सिद्धिमास्थिता जनकादयः।
ज्ञाननिष्ठैरपि ततः कार्यं कर्माश्रमोचितम्॥’ इति च
‘अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसङ्ग्रहम्।
अद्वैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा॥ (गी.ता.3.22)

‘ममैव केवलं नास्ति केनाप्यर्थस्तथाऽप्यहम्।
कर्मकृल्लोकरक्षायै तस्मात्कुर्वीत मत्परः॥’

**इति कृष्णासंहितायाम्।(गी.ता.**3.30)

‘नाहं कर्ता हरिः कर्ता मत्पूजा कर्म चाखिलम्।
तथापि मत्कृता पूजा तत्प्रसादेन नान्यथा॥
नाहं कर्ता तु सर्वस्य कर्तैको विष्णुरव्ययः।
इति विद्वांस्तु सन्न्यासी नान्यथा तु कथञ्चन॥’ इति निवृत्ते।

‘मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥’ इति। (गी.ता.3.30)

'स्ववन्दनं यथा पित्रा कारितं शिशुकर्तृकम्।

एवं पूजा विष्ण्वधीना भवेज्जीवकृतेत्यपि॥' इति प्रवृत्ते।

'व्यवायामिषमद्यानि हरेः पूजार्थमेव तु।

वामदेव्यो महायज्ञो व्यवायो हरिपूजनम्॥

व्यवाययज्ञे मद्यं तु सोमात्मकतयेष्यते।

क्षत्रियादेर्न विप्राणां विप्रो दोषेण लिप्यते॥'(भा.ता.11.5.13)

## (सूर्य-सूर्यकयोरिव जीवब्रह्मणोरन्तरमस्ति)

'यदन्तरं प्रलयवारिविप्लुषोर्यदन्तरं स्तम्बहिरण्यगर्भयोः।

स्फुलिङ्गसंवर्तकयोर्यदन्तरं तदन्तरं विष्णुहिरण्यगर्भयोः॥

आरोग्यं भास्करादिच्छेत् श्रियमिच्छेद्धुताशनात्।

शङ्करात् ज्ञानमन्विच्छेत् मोक्षमिच्छेज्जनार्दनात्॥

इत्यादि बहुप्रमाणैः विष्णोः परतरत्वं सिद्धम्॥

# 2. सत्यं जगत्

## (न विश्वं भ्रान्तिकल्पितम्)

'कुलालेन मृदा यद्वन्निर्मीयन्ते घटादयः।

विष्णुनैवं प्रकृत्यैव निर्म्यते जगदीदृशम्॥

एष त्रिसर्गो विष्णोस्तु वृथा, लोकस्य चावृथा।

इन्द्रजालवृथासृष्टिं मन्यन्ते ज्ञानदुर्बलाः॥

नित्यं निरस्तेन्द्रजले स्वत एव कथं भवेत्।

अक्षमाः सत्यसृष्टौ हि मायासृष्टिं वितन्वते॥

अनन्ताचिन्त्यविभवः कथं तामीहते हरिः।

निर्दुःखपूर्णानन्दत्वाद् यमाहुः सत्यमच्युतम्॥

एवं विधानुभावो यः स कथं निन्दितं सृजेत्।
स्वप्नादिकं परो देवः प्राणादिस्थस्तनोत्यसौ॥
केवलस्य परस्यास्य मायासृष्टिर्न युज्यते।
तस्माद् बाधायुताः सर्वे स्वप्नाद्या ये त्वकल्पकाः॥
इदं न बाधते सर्वं जगत्केवलजं यतः।
मोक्षवत्केवलस्यास्य शक्त्या सम्यग्विजृम्भितम्॥

एतद्रहस्यं परमं ब्रह्मसूत्रपदोदितम्।
ये त्वेतन्न विजानन्ति ते हि यान्त्यधरं तमः॥
ये त्वेतदनुतिष्ठन्ति पारम्पर्यागतं मम।
ते यान्ति परमं स्थानं ममैवोदितमञ्जसा॥'

**इति भागवततन्त्रे ।** ( **भा.ता**.1.1)

## (पुराणाद्युक्ताः मोहकविषयाः)

'अज्ञानं नाशितवापि जन्म जीवैरभिन्नता।
प्रकृत्यभिन्नता वापि जीवाभेदः परस्परम्॥
जडभेदोऽथवा विष्णोर्मिथ्यात्वं जगतोऽपि वा।
अगुणत्वमदेहत्वम् अकर्तृत्वं तथा हरेः॥
सम्यग्भक्तिमृते विष्णौ विष्णौ तद् द्वेषतस्तथा॥
मुक्तावभोगो जीवानां मुक्तौ साम्यं तथैव च।
अरूपत्वं च जीवानां मुक्तानां बन्धिनामपि॥
नामतीर्थादिभिर्मुक्तिस्तत्त्वज्ञानं विनापि तु।
विष्णोः सकाशात्प्रकृतेः ब्रह्मणोऽनन्तरुद्रयोः॥
गरुडेन्द्रसूर्यविघ्नादेरग्निसोमगुहादिनाम्।
प्रद्युम्नस्यानिरुद्धस्य देवविप्रादिनामपि॥
यैः कश्चापि गुणैर्विष्णोः सकाशाद् वरता तथा॥

यदा कदापि यत्नैर्वा वरशापादिनाऽपि वा।

तपसा वाप्युपायैर्वा योगज्ञानादिनाऽपि वा॥

साम्यं वा विष्ण्वधीनत्वादन्यथैषां स्थितिः कृतिः।

असंसारित्वमेतेषाम् एषामीश्वरता तथा॥

विना विष्णुप्रसादेन मुक्तिरेषां सकाशतः।

विष्णोः प्रयोजनावाप्तिः विष्णोर्दोषश्च कश्चन॥

विष्णोः सर्वेषु रूपेषु सम्पूर्णगुणहीनता॥

भेदो वा विष्णुरूपेषु विशेषो वा गुणेषु च।

श्रियः सकाशादाधिक्यं ब्रह्मादेः साम्यमेव च॥

ब्रह्मवाय्वोरनन्तस्य रुद्रस्य गरुडस्य च।

तेभ्यश्चैवेन्द्रसूर्यादेः विप्रभूपादिनां ततः॥

बद्धानां मुक्तिगानां वा दैत्यादेर्मोक्ष एव च।

सर्वं मोहार्थमुद्दिष्टं वेदेशु हरिणापि वा॥’

**इति ब्रह्माण्डपुराणे तत्त्वनिर्णयगीतायाम्** ( **बृह**.**भा**.**उ**.3.5.4.)

## (विश्वसत्यत्वे प्रमाणोदारहणम्)

‘विष्णोरहेयतां ये च स्वगुणैः पूर्णतामपि।

यो न वेद तथा यश्च जीवैरैक्यं हरेर्वदेत्॥

यश्चासत्यं जगत् ब्रूयात् सर्वे ते तमसि स्फुटम्।

मज्जन्ति सर्ववेदैर्हि गुणैः सर्वैर्हरिर्यतः॥

पूर्णो नित्यमपूर्णश्च जीवो मुक्तावपि स्फुटम्।

उपासते जगच्चैतत्सर्वदाऽऽद्यन्तवर्जितम्।

न कदाचिज्जगन्नाथो न कदाचित्तदन्यथा।

जगत् प्रवाहरूपेण सर्वदैव व्यवस्थितम्।

सत्यो विष्णुः श्रीश्च सत्या जीवाः सत्या जडं तथा।

असत्यं नास्ति किञ्चित्तु सर्वेषां ज्ञानगोचरम्।

ज्ञात्वा विष्णुमतो मुक्तिं प्राप्नुयात्पुरुषोत्तमम्॥'

**इति भविष्यत्पर्वणि।** (**बृह.भा.**3.5)

'पूर्णशक्तेः कुतो माया सार्वज्ञात्स्वप्नवत्कुतः॥' इति हरिवंशेषु।

'अचेतना चेतनेति द्विविधा प्रकृतिर्मता।

त्रिगुणाऽचेतना यत्र चेतना श्रीर्हरिप्रिया।

ते उभे विष्णु वशगे जगतः कारणे मते॥

पिता विष्णुः स जगतो माता श्रीर्या त्वचेतना।

उपादानं तु जगतः सैव विष्णुबलेरिता। इति च ॥'नारदीये।

'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्।

महामायेत्यविद्येति नियतिर्मोहिनीति च ॥

प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते॥' इति समाचारे

'प्रघान्वस्य महतो महानि सत्या सत्यस्य कारणानि वोचम्।

सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः।

यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता॥'

(**ऋ.**8.1.17)

'सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये।' (ऋ.5.7.2.5)

'सत्या विष्णोर्गुणास्सर्वे सत्या जीवेशयोर्भिदा॥

सत्यो मिथो जीवभेदः सत्यं च जगदीदृशम्।

असत्यः स्वगतो भेदो विष्णोर्नान्यदसत्यकम्॥

जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः।

जीवेशयोर्भिदा चैव जीवभेदः परस्परम्॥

जडेशयोर्जडानां च जडजीवभिदा तथा।

पञ्चभेदा इमे नित्याः सर्वावस्थासु सर्वशः॥

मुक्तानां च न हीयन्ते तारतम्यं च सर्वदा॥'

इत्यादि वेदवाक्यम्

'विश्वं सत्यं मघवाना यवोरिदापश्च न प्रमिनन्ति व्रतं वाम्।'

'याथातथ्यतोऽर्थान् व्यदघात् शाश्वतीभ्यः समाभ्यः।' (ई.शा.8)

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्॥'(गी.ता.16-8)

इत्यादिना अन्यथाज्ञानिनां निन्दादिश्रवणात् जगत्सत्यत्वं सिद्धम्।

न च 'स्वप्नमाया' इत्यादिवाक्यसिद्धं स्वप्नादिसाम्यं जगतः। 'बिभेत्यल्पश्रुताद् वेदः मामयं प्रचलष्यति।', 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।' इति न्यायेन इतिहासादिविचारे तद्वचनानां प्रतीतार्थकत्वाभावात्।

## (विश्वं मायिकमसत् इत्यादिप्रमाणानां हार्दम्)

'

'मनोमात्रं हरेर्यस्मात् मनसा मीयते जगत्।

व्याप्ते मनसि विष्णोश्च स्थितत्वाद् वासनामयम्॥

वस आच्छादने यस्मात् धातोर्वा वासनामयम्॥'

इति शब्दनिर्णये।

'स्वतन्त्रं परमार्थाख्यं स्वतन्त्रेका हरेर्मतिः।

सैव माया समुद्दिष्टा मुख्यतस्तत्स्वरूपिका॥

मतिमन्मतिभेदो वा न विष्णोः क्वचिदिष्यते।

पारमार्थ्येन नास्त्येव तदन्यत्तद्वशं यतः॥

अनाद्यनन्तकालेऽपि विद्यामानमपि ध्रुवम्।

अतो (माया)मयं चाऽहुः सर्वं तद्वशगं यतः॥'

**इति मायावैभवे।** (भा.ता.11.8.8)

'स्वाधीनं सदिति प्रोक्तं पराधीनमसत् स्मृतम्।

अविद्यमानमेतस्मात् जगदाहुर्विपश्चितः॥

अनाद्यनन्तकालेऽपि विद्यमानमपि ध्रुवम्।

अस्वातन्त्र्यात्तु नास्त्येवेत्येव वाच्यं जगत्सदा।

सदावृत्तेर्विद्यमानमिति ब्रूयाद्यदि क्वचित्।

तदापि नाशवद्धीदं प्रवाहाद् यस्य नित्यता॥

अतो निवर्त्यमित्याहुः प्रपञ्चो ह्यस्ति यद्यपि।

विष्णोरिच्छावशत्वाच्च मायामात्रमिति स्फुटम्॥

यथैव राज्ञी विज्ञाते नान्योऽस्तीति स्फुटं वचः।

स्वातन्त्र्यात्पारतन्त्र्याच्च तद्भृत्यादिषु सत्स्वपि॥

पुत्रा मे यदि विद्यन्ते मरिष्यन्त्येव ते ध्रुवम्।

यदि राज्यं करोत्येष नश्यत्येतदसंशयम्॥ इति

धृतराष्ट्रवचनवत् 'प्रपञ्चो यदि' इति श्रुतिः।

अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यते॥

तस्मादेकं परं ब्रह्म वस्तुशब्दोदितं सदा॥' इति लक्षणे।

'स्वप्नोऽयमित्यविज्ञानात् स्वाप्नदुःखमुपाश्नुते।

निजस्वरूपानुभवराहित्याद् तद्वदेव तु।

जाग्रद्दुःखमपि प्रोक्तं विष्णुतत्त्वमपश्यतः।

तस्मात्तदस्वभावत्वात् सदप्येतदवास्तवम्॥'

**इति लोकसंहितायाम्।** (**भा.ता**.11.11.2)

'त्रिगुणा प्रकृतिर्माया तज्जत्वाद् विश्वमीदृशम्।

अनाद्यनन्तकालेषु मायेत्याहुर्विपश्चितः।

आयेति फलमुद्दिष्टं प्रोक्तं मायेति निष्फलम्।

फलाल्पत्वात्तु मायैषा सम्प्रोक्ता त्रिगुणात्मिका।

महाफलप्रदत्वात्तु विष्णुराय इतीरितः॥

**इति निवृत्ते** ( **भा.ता**.11.11.2)

'पारामार्थिकसत्यत्वं स्वातन्त्र्यमभिधीयते।

तद्विष्णोरेव नान्यस्य तदन्येषां तदाश्रयात्॥' इति सम्मते।

'असमर्थमसत्प्रोक्तं समर्थं सत्प्रकीर्तितम्॥' इति च

जगतो नास्तिता सैव या पराधीनता सदा।

अभावस्तु कुतस्तस्य यद्विभातीह सर्वदा॥' इति प्राकाश्ये। (भा.ता.11.18.13)

'अविद्यमानता नाम जगतः परतन्त्रता।

यथाऽशक्तः स्वपुत्रादिरसन्नित्युच्यते जनैः॥' इति विवेके।

'अस्त्येव स्वप्नमखिलं वासनारूपमात्मनि।

जाग्रदेतदिति ज्ञानं यत् तदेतत् भ्रमात्मकम्॥

तद्वज्जगदिदं सर्वं विद्यमानं न संशयः।

स्वतन्त्रमेतदिति तु यद् ज्ञानं तद्भ्रमात्मकम्॥'

**इति च** (**भा.ता**.11.28.23)

## (अनित्यत्वविकारित्वादिना स्वप्नसाम्यं जगतः उच्यते)

'अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः।

स्वप्नादिसाम्य जगतो न तु बोधनिवर्त्यता॥

सर्वज्ञस्य यतो विष्णोः सर्वदैतत्प्रतीयते॥' इति महोपनिषदि।

'प्रज्ञाविनिर्मितं यस्मादतो मायामयं जगत्।

अनेनानुगतं यस्मात् अनृतं तेन कथ्यते॥

बोधनिवर्त्यमपि तु नित्यमेव प्रवाहतः।

अ इत्युक्तः परो देवः तेन सत्यमिदं जगत्॥

तदधीनस्वरूपत्वादसत्यं तेन कथ्यते॥' इति महोपनिषदि।

'रूप्यत्वात्तद्वशत्वाच्च तद्रूपं च तदीर्यते।

न तु तस्य स्वरूपत्वात् निर्दोषानन्दरूपिणः॥

कथं जडाजडैक्यं स्यात्कुतः पूर्णाल्पमोदयोः।

पूर्णाल्पज्ञानयोश्चैव पूर्णशक्त्यल्पशक्तयोः॥

निर्दुःखदुःखान्वितयोः स्वतन्त्रपरतन्त्रयोः।

अतः सर्वगुणैर्युक्तं सर्वदोषविवर्जितम्॥

अन्यभेदेन विज्ञाय तम एव प्रपद्यते॥' इति भागवते॥

'गृह्णन्ति ये हरिं त्वन्यदेवादिसममेव तु।

नीचं ब्रह्माद्यनन्यं वा मन्यन्ते नेति चाखिलम्॥

तत्तच्छ्रद्धायुतास्ते तु तामसाः परिकीर्तिताः' (गी.ता.17.4)

'मुख्यतो विष्णुशक्तिर्हि मायाशब्देन भण्यते॥

उपचारेण प्रकृतिर्जीवश्चैव हि भण्यते॥' इति पाद्मे।

'माया तु महिमा प्रोक्ता प्राचुर्येण मयट् यतः॥' इति च ।

'मयं प्राचुर्यमुद्दिष्टं माया स्यात्प्रचुरेत्यपि॥'

**इति तन्त्रनिरुक्ते।**(**भा.ता**.11.8.8.)

'यदि शब्दस्त्ववस्तुत्वे चास्वातन्त्र्ये च संशये।

अवस्तु शब्दश्चाशक्तेः अल्पशक्तौ च कीर्त्यत॥'

**इति शब्दनिर्णये।**(**भा**.11.8.34)

'श्रीस्तु विद्या समुद्दिष्टा मायाऽविद्या प्रकीर्तिता।

ते त्वनादि हरेरिच्छानियते सर्वदैव तु॥' इति मायावैभवे।

किञ्चि परिदृश्यमानविश्वस्य मिथ्यात्वे सत्यजगद्भ्याङ्गाकारो दुर्वारः।'अधिष्ठानं च सदृशं सत्यवस्तुद्वयं विना न भ्रान्तिर्भवति क्वापि' इत्युक्तेः।

ननु 'सलिलि एकोऽद्वैतो भवति' 'नेह नानास्ति किञ्चन' 'मृत्योः स मृत्युमाप्नोति' 'यत्र हि द्वैतमिव भवति' 'यत्र त्वस्य सर्वमात्मैवाभूत्' न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते न तु तद्द्वितीयमस्ति।

'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।'

'एकमेवाद्वितीयं ब्रह्म।' (छा.6.2.1)

'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः' । (माण्डूक्यं)

'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥' (भ गी.10.39)

इत्यादिश्रुतिस्मृत्यन्यथानुपपत्त्या विश्वमिथ्यात्वं सिद्धमिति चेत् न। तद्वाक्यानां तदर्थकत्वाभावस्य तत्रैव पूर्वापरपर्यालोचनया निश्चितत्वात्। प्रत्युत विश्वसत्त्यत्व एव तद्वाक्यानां प्रमाणत्वेन लक्ष्मीनारायणमुन्युक्तं सत्यं जगत्ततत्त्वत इति सिद्धम्।

## 3. तत्त्वतो भेदः

## (जीवपरभेदे मानानि)

'चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो।

जीवाः ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः॥

इतरेष्वात्मशब्दस्तु सोपचारः प्रयुज्यते।'

'अनन्तानां तु जीवानां यतन्ते केचिदेव तु॥

मुक्त्यै तेषु च मुच्यन्ते केचिन्मुक्तेषु च स्फुटम्।

केचिदेव हरिं सम्यक् ब्रह्मरुद्रादयो विदुः॥

अन्येषां यावता मुक्तिस्तावद् ज्ञानं हरौ परम्॥'

**इति पाद्मे(गी.ता.**7.3)

'मुक्तानामपि सिद्धानां नारायणपरायणः।

सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामते॥' इति भागवते।

'देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि।

जीवस्य स सतु विज्ञेयो जीवात् भेदेन मुक्तये॥'

**इति हरिवंशे।**(**कठ**.2.4.18)

'सतां विमुक्तिदाद् विष्णोर्मुक्तिर्यद्यभ्युपेयते।
बन्धोऽपि तत एव स्याद्यस्मादेकस्तयोः पतिः॥'

**इति स्कान्दे।**(**भा.ता**.10.94.29)

'आत्मानं मुक्तिदं विष्णुं यदि पुंस उदीक्षयेत्।
सुप्रसन्नस्तदा बन्धस्तत एवेति सेत्स्यति॥' इति ब्राह्मे।

'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥' (भ.गी.10.8)

'परंभूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। (भ.गी.14.1)

'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्॥
सम्भवः सर्वभूतानां ततो भवति भारत॥' (भ.गी.14.3)

'ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ (भ.गी.14.27)

**इति गीतायाम्।**

'यथा कन्थापटाः सूत्रे ओताः प्रोताश्च संस्थिताः।
एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितम्॥'

**इति स्कान्दे।** (**भा.ता**.6.3.12)

'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥'

**इति गीतायाम्।**(7.7)

'एकः स्वतन्त्रो भगवान् तदीयं त्वन्यदुच्यते॥' इति भागवते

'न ऋते त्वत्क्रियते किञ्चनारे'

'तापनी पाचिका चैव शोषणी च प्रकाशिनी।

नैव राजन् रवेः शक्तिः शक्तिर्नारायणस्य हि॥ इति पाद्मे (ऐ.भा.3.1)

'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्'

'पुरुषेणैवेदं सर्वं व्याप्तं यद्भूतं यच्च भव्यम्'

'आतृणादाकरिषात्सर्वं भगवानेवेति मिथ्यादृष्टिरेषा' इति श्रुतिः

'सुपर्णौ द्वौ शरीरस्थौ जीवश्च परमस्तथा।

पारवश्यादिना जीवः सुपर्णेति श्रुतौ श्रुतः॥

स्ववशोऽनादनाद् विष्णुर्नात्तीत्यत्रापि संश्रुतः।

स एव हि शुभस्यात्ता जीवोऽत्ताऽस्यैव वेदनात्॥

इति कूर्मसंहितायाम्

## (पुरुषोत्तमस्त्वेकः पुरुषा अनेके)

'नैवैक एव पुरुषः पुरुषोत्तमोऽसावेकः कुतः।

स पुरुषो यत एव जात्या अर्थात् श्रुतेश्च गुणतो

निजरूपतश्च नित्यान्य एव कथमस्मि स इत्यपि स्यात्।

रक्षया वाथ सृष्ट्या वा संहृत्यादेर्न तु क्वचित्।

आर्थो विष्णोस्तथाप्येषः स्वभावात्सर्वकर्मकृत्।

मत्तो नृत्यादिकं यद्वत्कुर्यात्सुखविशेषतः।

परमानन्दरूपत्वात्कुर्याद्विष्णुस्तथैव तु॥' इति परमश्रुतिः।

'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे।'

'आत्मारामा हि मुनयो निर्ग्रन्थ्या अप्युरुक्रमे।

कुर्वन्त्यहैतुकीं भक्तिं इत्थम्भूतगुणो हरिः॥' इति भागवते

'ये दोषा इतरत्रापि ते गुणाः परमे मताः।

न दोषः परमे कश्चित् गुणा एव निरन्तराः॥' इति हरिवंशेषु।

## (विष्ण्वेकनिष्ठाः महागुणाः)

अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।

स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरह्ग्र्यं पुरुषं महान्तम्॥ इति च।

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।'

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।'इति श्रुतिः।

'सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु।

कुरुते केवलानन्दो यथा मत्तस्य नर्तनम्॥

पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः।

मुक्ता आप्याप्तकामाः स्युः किमु तस्याखिलात्मनः॥'

**इति नारायणसंहितायाम्।**

'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का।

चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाङ्गैश्च तथा प्रतीताः॥'

**इति सौपर्णशाखायाम्**

'नित्यतीर्णाशनयादिरेक एव हरिः स्वतः।

अशनायादिकानन्ये तत्प्रसादात्तरन्ति ते॥'

**इति पाद्मे ।(ब्र.सू.भा.1.3.14)**

'नरकेऽपि वसन्नीशो नासौ दुःखी स उच्यते।

नासौ नीचोच्चतां याति पश्यत्येव प्रभुत्वतः॥'

**इति भागवततन्त्रे।(ब्र.सू.भा.3.1.17)**

'पयोदचलनाद् वृक्षप्रतिबिम्बप्रचालनात्।

तटस्थवृक्षचलनं कल्पयेदबुधो जनः॥

तथा मनसिजैर्दोषैराभासैर्दूषिते नरे ।

आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पते॥

आत्मनश्चक्षुषा भ्रान्त्या यथा पश्येद्भ्रमं भुवः।

तथैव चात्मनो दोषाद्दोषवद् ब्रह्म पश्यति॥' इति ब्रह्मतर्के।

## (विष्णोः सर्वावतारेषु गुणादिषु च न विभेदः। सर्वे पूर्णाः)

'नेह नानास्ति किञ्चन' 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।

एवं धर्मान् पृथक् पश्यन् तानेवानुविधावति।' इति श्रुतिः।

'तस्य सर्वावतारेषु न विशेषोऽस्ति कश्चन।

देहदेहिविभेदश्च नेश्वरे विद्यते क्वचित्॥

सर्वेऽवतारा व्याप्ताश्च सर्वसूक्ष्माश्च तत्त्वतः।

ऐश्वर्ययोगात् भगवान् क्रीडत्येव जनार्दनः॥'

**इति महासंहितायाम्।**(**भा.ता**.1.4.29)

'देहेन्द्रियादिभेदेन निर्भेदोऽपि हरिः स्वयम्।

भण्यते केवलैश्वर्यादनाद्यानन्दचिद्घनः॥' इति गारुडे।

'ब्रह्मादिस्थावरान्तेषु न विशेषो हरेः क्वचित्।

व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति च ॥' इति च।

'

'एवं सुरारेष्वप्यास्थितो भगवान् हरिः।

नैव भेदेन मन्तव्यो जीवभेदेऽपि सत्यपि॥' इति गारुडे।

'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥' इति श्रुतिः।

'मत्स्यकूर्मादिरूपाणां गुणानां कर्मणामपि।

तथैवावयवानां च भेदं पश्यति यः क्वचित्॥

भेदाभेदौ च यः पश्येत् स याति तम एव च।

पश्येदभेदमेवैषां बुभूषुः पुरुषस्तथः॥

अभेदेऽपि विशेषोऽस्ति व्यवहारस्ततो भवेत्।

विशेषणां विशेषस्य तथा भेदविशेषयोः।

विशेषस्तु स एवायं नानावस्था ततः क्वचित्।

प्रादुर्भावादिरूपेषु मूलरूपेषु सर्वशः॥

न विशेषोऽस्ति सामर्थ्ये गुणेष्वपि कदाचन ( गी.ता.2.25)

एकं रूपं हरेर्नित्यमचिन्त्यैश्वर्ययोगतः॥ (गी.ता.11.9)

बहुसङ्ख्यागोचरं च विशेषादेव केवलम्।

विशेष्यस्य विशेषस्याप्यभेदेऽप्यविवादिनी॥

विशेषोऽस्त्येव नात्रास्ति ह्यनवस्था कदाचन॥' इति तत्त्वविवेके।

'भेदेन दर्शनात् वापि भेदाभेदेन दर्शनात्।

विष्णोर्गुणानां रूपाणां तदङ्गानां मुखादिनाम्॥

तथा दर्शनकालात्तु क्षिप्रमेव तमो व्रजेत्॥'

**इति ब्रह्माण्डे** (**बृ.भा**.3.5)

'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान्।

प्रोच्यते भगवान् विष्णुरैश्वर्यात्पुरुषोत्तम्॥'इति च।

'देहदेहिविभागश्च न कश्चित्परमेश्वरे।

गुणतद्वद्विभागौ वा नेह नानेति हि श्रुतेः॥

**इति पाद्मे।** (**कर्म.नि.मं**.7)

## (न प्राकृतो देहः विष्णोररस्ति)

'आनन्दरूपं दृष्ट्वा तु लोको भौतिकमेव तु।

मन्यते विष्णुरूपं चाहो भ्रान्त्रिर्बहुत्थिता॥' इति स्कान्दे।

'पृथिवीलोकसन्त्यागो देहत्यागो हरेः स्मृतः।

नित्यानन्दस्वरूपत्वादन्यत् नैवोपपद्यते॥

दर्शयेज्जनमोहाय सदृशीं मृतिकाकृतिम्।

नटवद् भगवान् विष्णुः परज्ञानाकृतिः सदा॥'

**इति स्कान्दे (भा.ता.3.4.29)**

मत्स्यकूर्मादिरूपं च विष्णोर्ज्ञानैकरात्रकम्।

तन्मन्यन्ते भौतिकं तु ते गच्छन्त्यधरं तमः॥

**इति ब्राह्मे (भा.ता.3.33.21)**

## (चतुर्विधो विनाशः विष्णोः न भवति)

'अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता।

नाशश्चतुर्विधः प्रोक्तः तदभावो हरेः सदा॥'

**इति वामने।(गी.ता.2.1.7)**

'कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहवदेव च।

लोकानां दर्शयामास स्वरूपसदृशाकृतिम्॥

येन रूपेण कंसादीन् जघ्ने तद्रूप एव हि।

पूज्यतेऽद्यापि शर्वाद्यैः निर्मितान्या शवाकृतिः॥

स्वर्गारोहणकाले हि जनास्तेनैव मोहिताः।

यत्तद्रूपं निजं विष्णोर्दृष्टं सर्वनरैर्भुवि॥

आद्यापि तद्देवलोके पूज्यते सर्वदैवतैः॥'

**इति स्कान्दे ( ऐ.भा.3.4.)**

## (सकलदोषविदूरो विष्णुः)

'य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिगित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः।'

'प्रत्यक्षत्वं हरेर्जन्म न विकारः कथञ्चन॥' इति पाद्मे

'आनन्दमात्रमजरं पुराणम् एकं सन्तं बहुधा दृश्यमानम्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्।
तद् विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति।'

**इति पुरुषोत्तमसंहितायाम्।**

## (विष्णुप्रसादात् रमादयस्तं किञ्चिज्जानन्ति)

यथा हरिः स्वमात्मानं वेद तद्वद् रमापि न।
ब्रह्मा च कुत एवान्ये विदन्त्येव तथापि तु॥' इति माहात्म्ये।

'सर्वजीवनिकायेषु ब्रह्मवायू हरेर्विदौ।
न चान्यस्तादृशो वेत्ति यावद्वेत्ति हरिः स्वयम् ॥
तावत्तावपि नो विष्णुं जानीतो लोकवन्दितौ॥'

**इति ब्रह्माण्डे।** (**भा.ता.**2.63.5)

'यथाऽऽत्मानं हरिर्वेत्ति तथाऽन्ये नैव तं विदुः।
जानन्ति किञ्चित्क्रमशो रमाद्यास्तत्प्रसादतः॥' इति पाद्मे ।

मुक्ता अपि न विष्णुत्वं यान्ति तत्समतामपि।
आधिक्यं कुत एव स्यान्मुक्तानां मुक्तिदातृतः॥
कुत एव प्रलीनानां प्रलये तु तदात्मना।
ब्रह्मशर्वेन्द्रपूर्वाणां मुक्तावपि न विष्णुता॥
यदा तदा तु संसारे क्व तद्रूपत्वमिष्यते।
अन्योऽसौ सर्वतो विष्णुः स्वानन्त्याग्र्यगुणपूर्तितः॥'

**इत्यैतरेयसंहितायाम्।** (ऐ. भा. 2.2.)

‘स्ववेदनेऽन्यवित्तौ वा नासावन्यदपेक्षते।

स्वप्रकाश इति प्रोक्तस्तेनैव पुरुषोत्तमः।

जीवानां स्वप्रकाशत्वं तत्प्रसादात्स्ववेदनम्॥’ इति च ।

## (विष्णुर्विशेषतः देवादिषु रूपविशेषैस्सन्निहितः)

‘ब्रह्मणि ब्रह्मरूपी सः शिवरूपी शिवे स्थितः।

पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः॥’

**इति वामने** (**भा.ता.**1.3.23)

‘शङ्खचक्रभृदीशेषः श्वेतवर्णो महाप्रभुः।

आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतम्॥’ इति वाराहे

‘राम एको ह्यनन्तांशः तत्र रामाभिधो हरिः।

शुक्लकेशात्मकस्तिष्ठन् रमयामास वै जगत्॥’

**इति ब्राह्मे** (**भा.ता.**2.7.26)

‘ब्रह्मण्यनन्ते गरुडे रुद्रे कामे शचीपतौ।

अनिरुद्धे मनौ चैव पृतौ च कृतवीर्यजे॥

नारदे चैवमाद्येषु विशेषात्सन्निधिर्हरेः।

सुदर्शनादिमष्वस्त्रेषु तथा सन्निहितो हरिः॥’ (भा.ता.4.25.20)

‘ब्रह्मस्थो ब्रह्मनामासौ शिवस्थो रुद्रनामकः।

तयोरपि नियन्तैकः स्वयमेव जनार्दनः ॥’ इति स्कान्दे ।

## (किञ्चित्सादृश्यमात्रेण जीवेऽशत्वव्यवहारः)

‘जीवराशिः समस्तोऽपि ब्रह्मरुद्रेन्द्रपूर्वकः।

किञ्चित्सादृश्यमात्रेण भिन्नोऽप्यंश इवोच्यते॥

पुत्रभ्रातृसखित्वेन स्वामित्वेन यतो हरिः।
बहुधा गीयते वेदैर्जीवोंऽशस्तस्य तेन तु ॥'

(ब्र.सू.भा. 2.3.43)

'विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सादृश्यमात्रयुक्॥' इति वाराहे

## (जीवेषाधिर्द्विधा प्रोक्तः)

'जीवेषाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च।
बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः।
सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत्।
कथं चाऽत्मविनाशाय प्रयतः सेत्स्यति क्वचित्॥
अनर्थता च मुक्तेः स्यात् अभावात् पुंस एव तु।
ज्ञानज्ञेयाद्यभावाच्च सर्वथा नोपपद्यते॥
तस्मादेतन्मतं येषां तमोनिष्ठाः हि ते स्मृताः॥'

इति स्कान्दे।(भा ता. 4.22.26)

## (त्रिविधानन्त्यं विष्णोरेव)

'कालकोटिविहीनत्वं कालानन्त्यं विदुर्बुधाः।
देशकोटिविहीनत्वं देशानन्त्यं तथैव च ॥
गुणानामप्रयेत्वं वस्त्वानन्त्यं विदो विदुः।
आनन्त्यं त्रिविधं नित्यं हरेर्नान्यस्य कस्यचित्॥
तथापि देशतस्तस्य परिच्छेदोऽपि विद्यते ।
परिच्छेदस्तथा व्याप्तिरेकरूपेऽपि पूज्यते॥
तस्याचिन्त्याद्भुतैश्वर्याद् व्यवहारार्थमेव च ।
गुणानां कालतश्चैव परिच्छेदोऽपि कुत्रचित्॥'

इति ब्रह्मतर्के(भा.ता.3.11.2)

## (प्रत्यक्ष-तिरोहितभेदेन द्विविधं वैभवं रूपम्)

'द्विविधं वैभवं रूपं प्रत्यक्षं च तिरोहितम्।
कपिलव्यासकृष्णाद्यं प्रत्यक्षं वैभवं स्मृतम्॥
भिन्नं ब्रह्मादिजीवेभ्यो जडेभ्यश्चापि तद्गतम्।
साजात्याधिक्यदं तेषां तत्तिरोहितवैभवम्॥'

**इति त्रैलोक्ये ।(गी.ता.**3.11.2)

## (सर्वज्ञोऽपि विष्णुः अज्ञजनमोहनायावरेभ्यः वरादिकमर्थयति)

'हरिर्व्यासादिरूपेण सर्वज्ञोऽपि स्वयं प्रभुः।
श्रृणोति नारदादिभ्यो मोहायैषां प्रसिद्धये॥'

**इति पाद्मे।(भा.ता.**2.9.45)

'यदधीनश्रियोऽपाङ्गात् ब्रह्मरुद्रादिसंस्थितिः।
स पुत्रार्थं तपस्तेपे व्यासो रुद्रस्य चेश्वरः॥
कातर्यं दर्शयामास वियोगे लौकिकं हरिः।
कुतः कातरता तस्य नित्यानन्दमहोदधेः॥' इति स्कान्दे (भा.ता.1.2.2)

'अहमप्यवतारेषु त्वां च रुद्र महाबल।
तामसानां मोहनार्थं पूजयामि युगे युगे॥' इति पाद्मे।

'जीवव्यपेक्षया चैव तथान्तर्याम्यपेक्षया।
विष्णोस्तु श्रुतयो ज्ञेयाः विष्णोरैक्येन केवलम्॥
मोहनार्थं समुद्दिष्टास्तथार्थद्योतकास्तथा॥' इति प्रकाशिकायाम्।

## (पञ्चविधो भेदः न कदाचित् विनश्यति)

'ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः।

ब्रह्माणं तद्गुणैः स्तौति तद्वविष्णुव्यपेक्षया॥'

**इति पाद्मे।**(भा.ता.7.3.33)

'जीवेश्वरभिधा चैव जडेश्वरिभिदा तथा।

जीवभेदो मिथश्चैव जडजीवभिदा तथा॥

जडभेदो मिथश्चैव प्रपञ्चो भेदपञ्चकः।

स नित्य एव नोत्पाद्य उत्पाद्यश्चेन्नशेदपि॥

तस्मादनादिमानेव प्रकृष्टो भेदपञ्चकः।

विष्णोः प्रज्ञामितं यस्मात् न द्वैतं भ्रान्तिकल्पितम्॥

अद्वैतः परमो योऽसौ भगवान् विष्णुरव्ययः।

विकल्पो विनिवर्तेत कल्पितो यदि केनचित्।

अद्वैतं ज्ञानिनां पक्षे न तस्माद्विद्यते क्वचित्॥' इति परमश्रुतिः॥

'युक्त्यायुक्तत्वमपि हि यदधीनं सदेष्यते।

प्रमाणावगते तत्र कुत एव ह्ययुक्तता॥ इति च (गी.ता.2.25)

'एक एवद्वितीयोऽसौ तदतन्त्रस्य वर्जनात्।

तत्समस्याधिकस्यापि ह्यभावात्पुरुषोत्तमः॥'

**इति च ब्राह्मे।**(बृह.भा.अ.3)

'एक एवाद्वितीयोऽसौ हरिः सर्वेषु सर्वदा।

एक एवाद्वितीयोऽसौ अश्वमेधः क्रतुष्वपि।

एक एवाद्वितीयोऽसावहं चासावहेयतः॥ इति हरिवंशे।

'देवानां यो विदधाति कामान्'

'यत्र पूर्वे साध्याः सन्ति देवाः'

बहवः पुरुषा ब्रह्मन् उताहो एक एव तु।

को ह्यत्र पुरुषः श्रेष्ठः तं भवान् वक्तुमर्हति॥

## (भेदज्ञानमेव मुक्तिनिदानम्)

**वैशम्पायनः-**

नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्भव।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते॥
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्॥'

**इति मोक्षधर्मे।** (**गी.भा.**13.24)

'स्थाणुर्होचक्राम स प्रजापतिमुवाच।
कोऽसि के स्मः कः स इति । स होवाच
योऽस्मि ये स्थ स यः स इति। अथ हैनमुपाक्रोशत्।
सत्यं भिदा सत्यं भिदा सत्यं भिदा इति' महासंहितयां च।
'जीवेश्वरभिदां भ्रान्तिं केचिदाहुरपण्डिताः।
अनारम्भं तमो यान्ति परमात्मविनिन्दनात्' इति॥
'यथैकस्तु बहून् सुप्तान् असुप्तः पश्यति प्रभुः।
एवमीशो बहून् जीवान् अज्ञान् पश्यति नित्यदृक्॥

**इति व्योमसंहितायाम्।** (**भा.ता.**2.2.7)

## (भेदवक्ता हरेः प्रियः)

'केचिद्भेदं विनिन्दन्ति ह्यासुरज्ञानवृत्तयः।
निन्दां कुर्वन्त्यथो मन्दा भेदस्य परमार्थताम्॥
ये तु तत्त्वविदो मुख्या भेदं ब्रह्मान्यवस्तुनोः।
परमार्थमिति ज्ञात्वा नित्यं विष्णुमुपासते॥'

**इति गारुडे** (**भा.ता.**4.8.38)

उपपादयेत् परात्मानं जीवेभ्यो यः पदे पदे।
भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चन॥'

**इति पाद्मे ।** (**भा.ता.**5.5.26)

'यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रियः॥' इति च

'सुविरुद्धस्वरूपत्वात् जीवादन्यतमो हरिः॥'

**इति वामने** (**भा.ता**.7.2.41)

'अदृष्टेर्जीवपरयोः भेदस्य ज्ञो याति संस्मृतिम्।
अभेदनिश्चयाद्याति तमो नास्त्यत्र संशयः॥
अल्पसम्पूर्णदर्शित्वान्न साम्यं जीवकृष्णयोः॥' इति ब्रह्माण्डे।

'अनाद्यनन्तो भेदोऽयं स्वभावः परजीवयोः।
स्वतो वा परतो वापि न कदाचिद्विनश्यति।
एवं विजानतां विष्णुर्बहुजन्म न दास्यति॥'

**इति प्रमाणसंहितायाम्।**

'सुपर्णावेतौ सयुजौ सखायौ यदृच्छया कृतनीडौ च वृक्षे।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्॥'

**इति हरिवंशे ।** (**भा**.11.11.6)

'स्वरूपभेदो हि परजीवयोर्जीवगो मिथः।
परस्परेण वस्तूनां विशेषः शास्त्रदर्शिनः॥
सद्भेदोऽयं समुद्दिष्टस्त्वसत् भेदं च मे श्रुणु।
स्वरूपाणां गुणानां च विष्णोर्भेदः परस्परात्॥
सर्वस्य विष्णुतन्त्रत्वात् शत्रुमित्रादिभेदिता।
यच्चान्यच्छास्त्रविद्विष्टमसद्भेदः स ईरितः॥
सद्भेददर्शनान्मोक्षस्त्वसद्भेदात्तमो व्रजेत्।
इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः॥
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥' इति भारते॥

## (न मुक्तावपि भेदापगमः)

'ये वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते।

सर्वान् कामान् सह ब्रह्मणा विपश्चिता।'

एतमानन्दमयमात्मानमुपसङ्क्रम्य

इमान् लोकान् कामान्नीकामरूप्यनुसञ्चरन्'

सर्वे नन्दन्ति यशसा गतेन सभासाहेन सख्या सहायः।

किल्बिषसुत्पितुषर्हियेषामरं हितो भवति वाजिनाय।

'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'

'स तत्र पर्येति जक्षन् क्रीडन् रममाणस्त्रिभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।'

## (जीव-शरीरशब्दार्थकथनम्)

'अल्पशक्तिरसार्वज्ञं पारतन्त्र्यमपूर्णता।

उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः।

स्वभाविकं तयोरेतन्नान्यथा तु कथञ्चन।

वदन्ति शाश्वता वेदा अत एव महाजनाः।'

**इति श्रीविष्णुपुराणे।** (गी.ता.2.20)

'शरीरौ तौ उभौ ज्ञेयौ जीवश्चेश्वरसङ्ज्ञितः।

अनादिबन्धनस्त्वेको नित्यमुक्तस्तथापरः॥' इति नारदीये।

'भेदेनैव जगत्सत्यं भेदेनेशं गुणैः सदा।

भेदेन जीवान्योन्यं मुक्ताः पश्यन्ति सर्वदा॥'

**इति गारुडे।** (बृह.भा.5)

'सर्वज्ञाल्पज्ञताभेदात् तेन सत्येन मां देवस्त्रयान्तु सह केशवाः॥'

इति च

## (भेद सत्योऽप्यनादिश्च)

'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा मैवारुवण्यः।' 'आत्मा हि परमः स्वतन्त्रः सर्ववित्सर्वशक्तिः परमसुखः परमः जीवस्तु तद्वश अज्ञोऽल्पशक्तिरार्तोऽल्पकः' इत्यादिश्रुतिः॥

'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता।'

'जीवेश्वरभिदा चैव जडेश्वरभिदा तथा।

जीवभेदो मिथश्चैव जडजीवभिदा तथा।

मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः।

सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात्।

न च नाशं प्रयात्येषः न चासौ भ्रान्तिकल्पितः।

कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते॥' इति परमश्रुतिः।

## (असदुपासकानां तम एव भवति)

'अहं ब्रह्मेति वेनस्तु ध्यायन्नापाधरं तमः।

तद्राद्धान्तो महीं व्याप्तो भेर्या ख्यापयितोऽनिशम्॥

असुरा राक्षसाश्चैव पिशाचास्तत्पथि स्थिताः।

भूमौ तत्पृथुना सर्वं निरस्तं महितात्मना॥

वैवस्वतस्य समये जाताः क्रोधवशा भुवि।

ख्यापयन्ति दुरात्मानो मणिमांस्तत्पुरः सरः॥

**इति भविष्यत्पुराणे** (भा.ता.4.14.29)

'भिदा यदि न दृश्येत जीवात्मपरमात्मनोः।

मुक्त्यै तदपरोक्षाय को यत्नं कर्तुमर्हति॥'

**इति ब्रह्माण्डे।**(**भा.ता**.4.22.17)

‘पूर्वं तु पौण्ड्रको नाम वासुदेवः सुदुर्मतिः।
जातिस्मरो द्विधा शास्त्रं पाषण्डं निर्ममे नृपः॥
एकं तु वासुदेवाख्यं वासुदेवोऽहम् इत्यपि।
कुत्स्तितं वासुदेवत्वप्रतिपादकमात्मनः॥
तत्प्रशिष्यः क्रमुर्नाम नजानंस्तन्मतं परम्।
वासुदेवात्मतां सर्वजीवानामवदत्कुधीः॥
क्रिम्याख्यं शास्त्रमकरोद् अभेदप्रतिपादकम्।
कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयम्॥
तं दृष्ट्वाऽद्यापि वर्तन्ते वर्तिष्यन्ति तथा कलौ।
अशौचा अव्रताचारा वासुदेवोऽहमित्यपि॥’

**इति ब्राह्मे।**(**भा.ता**.1.4.18)

‘प्रविष्टत्वाच्छरीरेषु जीवा एवेति दुर्धियः।
मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत्॥
वेदवादविरोधित्वादनया तु तमो विशेत्॥’ इति ब्रह्माण्डे ।

‘ऐकात्म्यज्ञानतो यान्ति तमो भेदात्परं पदम्।
स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भवेत्॥’ इति ब्रह्मवैवर्ते।

‘ये जगत्प्रवदन्त्यज्ञा जीवादन्येशवर्जितम्।
तेषामपि तु तां वाचमीश एव ददात्यजः॥
न च तर्किर्भवेदीशो जीवो भेदविरोधतः।
व्यभिचारिणो यतस्तर्का इष्टसाधनगा अपि॥
कचित्कचिन्मृषा तर्काः कणादादिप्रदर्शिताः।
तत्त्वनिर्णयभीरूणां व्यवधानकरास्ततः।
नैव ते स्थिरबुद्धीनां कुर्युस्ते बुद्धिचालनम्।

मृषा तदीशवराभेदः सर्वोत्कर्षश्च जीवगः।
धनवत्त्वं च कर्तृत्वं बलवत्त्वं च विष्णवि।
अतो जीवेश्वराभेदं मिथ्येति कवयो विदुः॥'

**इति तन्त्रभागवते।** (10.94.37)

'जीवस्य जगतश्चैव परेशाभेदतो वचः।
अतात्त्विकं जगच्चेति विष्णवनधीनत्ववाचकम्॥
मृषा वाक्यं हि तद् ज्ञेयं तमोगतिविधायकम्।
अभेदस्तु कुतस्तस्य परमस्यावरेण तु॥
मिथ्यात्वं तु कुतस्तस्य जगतो नित्यदर्शनात्॥'

**इति वाराहे॥** (**भा.ता.**10.94.27)

## (ईशधर्माः न जीवेऽनुसन्धेयाः)

'यावत्तु गुणवैषम्यं तावन्नानात्वमात्मनः।
भेदबुद्धिस्तु यावत् स्यात् तावदीश्वरतन्त्रता।
यावदीश्वरतन्त्रत्वं तावत् तस्माद् भयं भवेत्।
उपासते य एवं तु नित्यशोके पतन्ति ते॥
महातमस्यनानन्दे तस्मान्नैवं विचिन्तयेत्।
तस्मान्नित्यं तु नानात्वं जीवनामीशतन्त्रता॥
स्वाधिकानां वशत्वं च मुक्तावपि सदेष्यते।
एवं ज्ञात्वा विमुच्यन्ते परानन्दं व्रजन्ति च॥'

**इति तन्त्रभागवते ।** (**भा.ता.**10.10.34)

'अस्वतन्त्रः स्वतन्त्रोऽस्मीत्येवं जीवः प्रभावयन्।
वध्यते हीशकोपेन राजभावेन भृत्यवत्॥

**इति स्वातन्त्र्ये**

'तं ये त्वैक्येन मन्यन्ते सर्वभिन्नं गुणोच्छ्रयात्।

कृपणास्ते तमस्यन्धे निपतन्ति न संशयः।

न तेषामुद्धृतिः क्वापि नित्यातिशयदुःखिनाम्॥

गुणभेदविदां विष्णोर्भेदाभेदविदामपि।

देहकर्मादिषु तथा प्रादुर्भावादिके तथा॥

स्वोद्रिक्तानां तदीयानां निन्दन्ति एव च।

सर्वेषामपि चैतेषां गतिरेषा न संशयः॥

अव्यक्तः परमात्माऽसौ व्यक्तो जीव उदाहृतः।

मन्यते यस्तयोरैक्यं स तु यात्यधरं तमः॥'

'जीवधर्मानीश्वरे तु यो जीवेष्वैश्वरानपि।

विद्याद् जीवेश्वरैक्यं च द्वन्द्वमोही स उच्यते॥'

**इत्याग्नेये।** (**गी.ता**.7.28)

## (मोक्षधर्मवचनेन ऐक्यवादनिरसनम्)

ऐक्यात्मं नाम यदिदं केचिद् ब्रूयुरनैपुणाः।

शास्त्रतत्त्वमविज्ञाय तथावादबलाज्जनाः॥

कामक्रोधाभिभूतत्वादहङ्कारवशङ्गताः।

यथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः॥

ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः।

वैगुण्यमेव पश्यन्ति न गुणान् विनियुञ्जते॥

तेषां तमःशरीराणां तम एव परायणम्।

यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः॥

कथमस्मि स इत्येष सम्बन्धः स्यादसंहितः।' (बृह.भा.3)

अन्य ईशस्तथाऽन्योऽहमिति ज्ञानं विपश्चिताम्॥

आधिक्यज्ञानमीशस्य यतोऽन्यत्वेन युज्यते॥ इति मोक्षधर्मे।

## (छान्दोग्ये दृष्टान्तनवकेऽपि भेद एवोक्तः)

‘यथा पक्षी च सूत्रं च नानावृक्षरसा यथा।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा।
यथा चोरापहार्यौ च यथा पुंविषयावपि॥
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ।
तथापि सूक्ष्मरूपत्वान्न जीवात्परमो हरिः॥
भेदेन मन्ददृष्टीनां दृश्यते परमोऽपि सन्।
वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथा॥’ इति परमोपनिषदि।

‘भेददृष्ट्याभिमानेन’ इति भागवतेऽपि भेदस्यैवोक्तेः।

## (असुरस्वरूपम्)

‘मदन्यो नास्ति देवेशः इति विद्यासुरं मतम्।
अस्तीति दैवमुभयोर्हरिरेव ह्यपेक्षितः॥

जीवादन्यं न पश्यन्ति श्रुत्यैवं विद्विषन्ति च ।
एतैस्त्वमसुरान्विद्धि लक्षणैः पुरुषाधमान्॥’ इति हरिवंशे

‘विष्णुं विहाय ये देवान् पितृन् भूतेशमेव वा।
साम्येन वा पूजयन्ति ते ज्ञेया असुरा गणाः॥’ इति च

‘येऽतिमानेन मन्यन्ते परमेशोऽहमित्यपि।
मिथ्या जगदिदं सर्वं भ्रमजत्वान्न तिष्ठति॥
मिथ्यात्वान्नेश्वरोऽप्यस्ति परेभ्यो न च जायते॥
स्वस्मिन्नपि तथान्यस्मिन् नियन्ताऽन्य इतीरिते।

प्रद्विषन्त्यसुरास्ते तु सर्वे यान्त्यधरं तमः॥

अयोग्येशत्वकामाच्च लोभाच्चाऽत्मसमर्पणे।

तत्त्ववेदिषु कोपाच्च तमस्तेषां न दुर्लभम्॥

अक्षगमानुमानां च स्वोक्तेरपि विरोधिनः।

तस्मात्ते ह्यसुरा ज्ञेया एवमन्येऽपि तादृशाः॥'

**इति ब्रह्मवैवर्ते।** (**गी.ता**.16.20)

'भिन्नोऽचिन्त्यः परमो जीवसङ्घात् पूर्णः परो जीवसङ्घो ह्यपूर्णः।

यतस्त्वसौ नित्यमुक्तो ह्ययं च बन्धान्मोक्षं तत एवाभिगच्छेत्॥'

**इति कौशीतकीश्रुतिः**

'यस्तूत्तमो भगवतः स मुक्तिं परमां व्रजेत्।

विष्णुना सर्वदेवैश्च मोदते सह नित्यदा॥'

**इति वाराहे ।** (**भा.ता**.11.2.46)

## (पातकोपपातकादिनां स्वरूपं फलनिरूपणं च)

'क्षुद्रपापानि पापानि चोपपातकपातके।

महापातकनामानि सुमहापातकान्यपि॥

तथा स्वतिमहान्तानि पातकानि विदो विदुः।

पिपीलिकावधादीनि क्षुद्रपापोदितानि च॥

पापमस्तिमतां हत्या फलचौर्यादिकं तथा।

परदारादिकं वाऽपि ह्युपपातकसञ्ज्ञितम्॥

पातकं शूद्रहत्यादि ब्रह्महत्यादिकं महत्।

देवस्वहरणादीनि सुमहान्ति विदो विदुः॥

देवावज्ञा सतां चैव ततोऽपि सुमहत्तरा।

महन्महत्तरा तस्या अवज्ञा केशवे तु या॥

केशवस्य समोऽस्तीति केशवोऽस्म्यहमित्यपि।

ब्रह्माद्याः केशवात्मानः श्रीर्वा निर्गुण इत्यपि॥

मुक्तस्य तद्भावमतिररूपत्वमतिस्तथा।

त्रिगुणात्मकदेहोऽस्याप्यस्तीत्यपि तु या मतिः॥

जन्ममृत्यादिबुद्धिर्वा दुःखाज्ञानादिबोधनम्।

तस्यापि परतन्त्रत्वविज्ञानं च तदुत्तमः॥

अस्तीति या मतिस्तस्य वशादन्यस्य कस्यचित्।

अस्तीति भावनेत्याद्याः अवज्ञाः सम्प्रकीर्तिताः॥'

**इति धर्मविवेके** (**भा.ता**.11.14.30)

'सुरा हरेर्गुणाः प्रोक्तास्ते मे स्युरिति चिन्तनम्।

सुरापानमिति प्रोक्तं तन्न कुर्यात् कथञ्चन॥'

(**भा.ता**.11.21.42)

ब्राह्मणो विष्णुरुद्दिष्टः स नास्तीत्यभिचिन्तनम्॥

ब्रह्महत्या सुमुद्दिष्टा तां न कुर्यात् कथञ्चन॥

**इति आगमतात्पर्ये** (**भा.ता**.11.21.43)

## (विष्णुपारम्यविदां महाफलम्)

'जीवाभेदं तथाऽभेदं जगतो ये विदुः प्रभोः।

तेऽपि यान्ति तमो घोरमधरं ब्रह्मतस्कराः॥

भेदाभेदं विदुर्ये च जीवैस्तु जगतोऽपि च।

परस्य ब्रह्मणो यान्ति तमस्तेऽप्युत्तरं सदा॥

तस्मात्सर्वोत्तमं विष्णुं पूर्णसर्वगुणोच्छ्रितम्।

विजानीयाद्विमुक्त्यर्थं सर्वतश्च विलक्षणम्॥

भिन्नं मिथो विजानीयुर्भिन्नाभिन्नविदोऽपि वा।

तेऽपि यान्ति तमो घोरं तस्मान्नैवं विदो विदुः।'

'यद्नारब्धपापं स्यात्तद्विनश्यति निश्चयात्।

पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः।' (ब्र.सू.भा.4.1.15)

'न ह्यानन्दो निजस्तेषां परैर्लभ्यः कथञ्चन।

किमु विष्णोः परानन्दो न ते विष्णो इति श्रुतेः॥'

'हरेरुपासना चात्र सदैव सुखरूपिणी।

न च साधनभूता सा सिद्धिरेवात्र सा यतः ॥'

**इति ब्रह्मवैवर्ते । (ब्र.भा.** 4.4.21)

'एतमानन्दमयामात्मानमनुविश्य न जायते न हसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमते॥' इति श्रुतिः।

'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।'

'बहवो ज्ञानतपसा पूता मद्भावमागताः।

इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।' इति गीतायाम्।

इत्याद्यनन्यथासिद्धानन्तप्रमाणैर्जीवेश्वरयोर्जगदीश्वरयोश्च पारमार्थिकभेदः सिद्धः।

## ( 'सलिल एको द्रष्टा' इति श्रुत्यर्थः)

नन्विदमसङ्गतम्। अभेदेऽपि श्रुत्यादीनां सत्त्वात्। अनन्यथासिद्धत्वं च समानमिति चेन्न। तेषामन्यथासिद्धत्वेनाद्वैतसाधकत्वाभावात्।

अत एव मिथ्यात्वासिद्धिः।

तथाहि। "नापि 'सलिल एको द्रष्टा अद्वैतो भवति' इति श्रुतिस्तत्र मानम्। 'एके मुख्यान्यकेवलाः' इत्यमरोक्तेः। किञ्च 'वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः। वृक्षान्तरात् सजातीयो विजातीयः

शिलादितः॥ तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते इति। ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात्" इतिवदत्र एकशब्दस्य स्वगतभेदनिषेधपरत्वेन व्याख्यातत्वान्न तेन मिथ्यात्वसिद्धिः। अद्वितीयशब्दोऽपि कर्मधारयो बहुव्रीहिर्वा। आद्ये ब्रह्म द्वितीयं न चेत्तृतीयं प्रथमं वा स्यात्। न द्वितीयः। बहुव्रीहेर्जघन्यत्वात्। अघटं भूतलमितिवत् द्वितीयाभावेनैव सद्वितीयत्वापाताच्च। तस्यापि निषेधे व्याघातात्। 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्' इति श्रुत्यन्तरे सविशेषणेतिन्यायेनमिषत्त्वेनैव निषिद्धत्वेन इहापि तथात्वसम्भवेन स्वरूपेण निषेधसिद्धेश्च। समाभ्याधिकराहित्यमेवाद्वितीयशब्दार्थः। 'न तत्समश्चाभ्याधिकश्च दृश्यते' इति श्रुतेः। 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति श्रुतेश्च। 'एक एवाद्वितीयो भगवांस्तत्सदृशः परमो नास्ति' इति श्रुतेः।

'ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः।
अद्वितीयो महाविष्णुः पूर्णत्वात्पुरुषः स्मृतः॥
भेदाभेदनिवृत्यर्थमेवशब्दोऽवधारकः॥'
इति स्मृतौ च व्याख्यातत्वाच्च।
उक्तं च 'यथा चोलनृपः सम्राडद्वीयोऽस्ति भूपतिः।
इति तत्तुल्यनृपति निवारणपरं वचः।
न तु तद्भ्रातृतत्पुत्रकलत्रादिनिवारकम्॥' इति।

'एक एवाद्वितीयोऽसावाकाशे सवितेतिवत्।
एकमेवाद्वितीयं सदग्र इत्यपि योज्यताम्॥'
इति च व्याख्यातुं शक्यत्वात्।

## (नेह नानेति श्रुत्यर्थः)

नापि 'नेह नानास्ति किञ्चन' इति श्रुतिस्तत्र मानम्। अत्र स्वगतभेदनिषेधस्योक्तत्वात्। नानाशब्दो हि नानात्वार्थः। द्येकयोरितिवद् भावप्रधानत्वात्। लोके नानाशब्दस्य पृथग्भाववाचित्वादिति कैय्यटोक्तेः। किञ्च किञ्चन विश्वं नाना नास्तीति उक्तेऽप्यविनाभूतमस्तीत्येवार्थः स्यात्। नानाशब्दो

हि विनेत्यर्थे वर्तते। 'पृथग्विनान्तरेणर्ते हि रुङ् नाना च वर्जने' इत्यमरोक्तेः। 'नानाविष्णुं मोक्षदो नास्ति देवः' इत्यमरव्याख्यायाम् नानाशब्दस्य विनार्थत्वेनोदाहृतत्वाच्च। 'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्' इति स्मृतेश्च॥ न च धूमोऽग्निविना नेत्युक्ते मिथ्येति सिद्ध्यति । एवञ्च।

'नानेत्यस्य विनार्थत्वाद् विनाभूतं निषिध्यते।'

'अविनाभूतमस्मीति सत्त्वैवार्थात्तु लभ्यते'

किञ्च विश्वं ब्रह्मणि नास्तीत्युक्तेऽपि न मिथ्यात्वासिद्धिः। ब्रह्मणोऽन्यत्र स्वोपादाने प्रकृत्यादौ सत्त्वसम्भवात्। ब्रह्म च नोपादानं, निर्विकारत्वाश्रुतेः। अथ 'यस्मिन् द्यौः पृथिवी चान्तरिक्षम्' इति श्रुतेः ब्रह्मण्यप्यस्ति विश्वं तर्हि तद्विरोधादेव न तत्र तन्निषेधः।

अनन्या राघवेणाहं भास्करेण प्रबा यथा।

व्याक्याऽत्र यादृशी तादृक् नेह नानेति च श्रुतेः॥

इति स्मृतिरप्यनुकूलेति॥

एतेन 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति पूर्ववाक्यमपि व्याख्यातम्। तत्र च इवशब्दो भेदाभेदपरः।

'भवेदेकत्र संयोग इवशब्दो विरुद्धयोः।

धर्मयोरुपमायां वा स्वल्पत्वे वा विवक्षितः॥' इति वचनात् ।

अन्यथा यो नानेव पश्यति न तु वस्तुतो नानेति परानिष्टार्थः स्यात्।

## (यत्र त्वस्य सर्वमात्मैवाभूत् इति श्रुत्यर्थः)

नापि 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति श्रुतिस्तत्र मानम्। अत्र हि पूर्वत्र 'स यथा सैन्धवखिल्य' इत्यारभ्य 'समुद्रजलस्थानीया मुक्ता बहव एकस्वभावावरुणवदपां खातवद्वा अपारो भवति' इत्येवं श्रुतिः स्वमतमुक्तवा 'अविनाशी वा अरे अयमात्मा' 'अनुच्छित्तिधर्मा' इति वाक्ये अविनाशीत्यनेनात्मनाशो मोक्ष इति बौद्धमतम्, अनुच्छित्तिधर्मेत्यनेन विशेषेण गुणोच्छेदो मोक्ष इति वैशेषिकमतं च निरस्याद्वितीयचिन्मात्रावशेषो मोक्ष इति मतेऽनिष्टं प्रसञ्जयितुं 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना प्रसङ्गाङ्गव्यतिरेकव्याप्तिमुक्त्वा 'यत्र त्वस्य' इत्यादिना यत्र

येषां मते त्वात्ममात्रवशेषः तर्त्तर्हि केन कं पश्येन्न केनापि कश्चित् तथा चेष्टस्य रूपादेरीश्वरस्य च स्वस्य चाज्ञानादन्धादेरिवातिदुःखं मोक्षे स्यादिति अनिष्टप्रसङ्गे वाऽभिहितः।

उक्तं च भारते –

'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्॥'इति॥

नापि 'यद् द्वैतं न पश्यति पश्यन् वै तन्न पश्यति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विध्यते अविनाशित्वात्। न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्।' इति श्रुतिस्तत्र मानम्।

'पूर्ववाक्ये हि शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा' इति नाडिस्थभगवन्मूर्तीनां विलक्षणरूपत्वमुक्तं तेन तत्र रूपाणाममेदः प्राप्तः। तथा तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपम्' इति षष्ठ्या रूपरूपिभेदश्च। तन्निराकर्तुं भगवद्रूपादीनामभेदोऽत्रोच्यते। ब्रह्म स्वगुणादिकं द्वैतं स्वस्माद् भिन्नं न पश्यति यतस्तद् द्वितीयं नास्ति। न हि द्रष्टुरीश्वरस्य दृष्टेर्विपरिलोपो बाधो विद्यत अविनाशित्वात् इत्यर्थः।

## (वाचारम्भणश्रुत्यर्थः)

नापि 'वाचरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।'

इति श्रुतिस्तत्र मानम्।

वाचारम्भणशब्दस्य मिथ्यात्वे योगरुढ्योरभावात्। आरभ्यत इत्यारम्भणमिति योगेऽपि कृद्योगे तृतीयाऽयोगात्। वाचारब्धकाव्यादेरिव मिथ्यात्वाभावाच्च। वागालम्बनमित्यस्य वागालम्बनमात्रमिति व्याख्यानमश्रुतकल्पनारूपमित्यसारम्। कथं विवर्तपक्षे मृत्पिण्डमृण्मयादिदृष्टान्ताः। ब्रह्माविद्याविशिष्टं सदुपादानमिति चेत्। न । मुमुक्षुज्ञेयशुद्धब्रह्मज्ञानेनैव सर्वविज्ञानप्रतिज्ञानात्। अन्यथा अविद्याया अपि येनाश्रुतमित्यादिप्रतिज्ञावाक्योक्तज्ञेयकोटित्वापातात्। अनाद्यविद्यदीन् प्रत्युपादानत्व-योगत्वाच्चेत्यादि दूषणगणग्रासात् परमते एकविज्ञानेन सर्वविज्ञानमयुक्तम्। अस्मत्पक्षे तु प्रधानपुरुषज्ञानाद् लोके ग्रामः जनपदः सर्वोऽपि ज्ञात आहूत इत्यादिव्यपदेशवदर्थ उपपद्यते।

पुराणादौ च –

'शशास पृथिवीं सर्वां सशैलवनकाननाम्।'

'नाशिता पृथिवी सर्वा धार्तराष्ट्रेण दुर्नयैः॥'

इत्यादेश्च व्यवहारस्य दर्शनात्॥

प्रधानभूतब्रह्मज्ञानादप्रधानभूतदेवतादिज्ञानफलसिद्धेः तद् युक्तम्। 'ज्ञानादेव सर्वे कामाः सम्पद्यन्ते' इति श्रुतेः। 'तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' इति स्मृतेश्च।

'यथा मृत्पिण्डविज्ञानात्सादृश्यादेव मृण्मयाः।

विज्ञायन्ते तथा विष्णोः सादृश्याज्जगदेव च॥

अनन्याधीनविज्ञानादन्याधीनं तथैव च।

मृदयोलोहनाम्नां हि ज्ञानात्साङ्केतिकं यथा॥' इत्यादिस्मृतेश्च।

एतेन एकविज्ञानेन सर्वविज्ञानान्यथानुपपत्तिर्मिथ्यात्वे मानमिति निरस्तम्। अक्षरसाम्येन निर्वचनेऽपि मात्रशब्दाश्रवणात्। त्वया नामधेयमित्यत्रापि नाममात्रं ह्येतदिति व्याख्यातत्वेन पौनरुक्त्याच्च। मृत्तिकेत्यत्रार्थविवक्षायाम् इति शब्दवैय्यर्थ्याच्च।

तदुक्तम्—

वाचारम्भणमित्युक्ते मिथ्येत्यश्रुतकल्पनम्।

पुनरुक्तिर्नामधेयमितीत्त्यस्य निरर्थता॥' इति।

तस्माद् वाचा वागिन्द्रियेणारम्भणमुत्पादनं यस्य साङ्केतिकशब्दस्य भाषाशब्दस्य तन्नामधेयं विकारः, कर्मणि ह्यत्र विकृतम् संस्कृतापभ्रंशरूपेण विक्रियमाणत्वात्। मृत्तिकेत्यादिसंस्कृत-नामधेयं तु सत्यं नित्यम्। 'नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरम्' इति एतच्छ्रुतावेवोत्तरत्र सत्यशब्दस्य नित्ये प्रयोगदर्शनात्। सदाशब्दात् अव्ययात् त्यप् इति त्यवन्तस्य सत्यशब्दस्य नित्ये प्रयोगसम्भवाच्च। 'सनातनं सत्यमिति नित्यमेवोच्यते बुधैः' इति वचनाच्च। टापं चापि हलन्तानां यथा वाचा निशा दिशा। इति वचनाद् वाचारम्भणमिति समासः साधुः। तस्मात्सादृश्यप्राधान्याभ्यामुपपत्तेः मिथ्यात्वं नानेन बोध्यते।

## (इदं सर्वं यदयमात्मा इति श्रुत्यर्थः)

नापि 'इदं सर्वं यदयमात्मा' इति श्रुतिस्तत्र मानम्। जडाजडयोरैक्यासम्भवेन ब्रह्मव्यतिरेकेणसत्त्वस्याभिप्रेतत्वादिति युक्तम्। 'सर्वेषु भूतेष्वेतम्' इति श्रुतेः सर्वं जलं लवणमितिवत्सर्वव्याप्त्या वा, 'स हि सर्वस्य कर्ता' इति श्रुतेः 'आयुर्वै घृतम्' 'ब्राह्मणोऽस्य मुखम्' इतिवन्निमित्तत्वेन वा 'यस्मिन् द्यौः पृथिवी च' इत्यादिश्रुतेः 'राजा राष्ट्रं ब्राह्मणो वै सर्वा देवता' इतिवत्सर्वाधारत्वेन वा 'न ऋते त्वत्क्रियते' इति श्रुतेर्यजमानप्रस्तरः इति वक्तत्सिद्ध्या वा, 'आदित्यो यूपः' इति वत्सारूप्येण वा सामानाधिकरणयोपपत्तौ सर्वप्रमाणवधितायाः यः पुरुषः स स्थाणुरितिवत् यत्सर्वत्वेन प्रतीतं तदात्मन्यध्यस्तमिति पदद्वयलक्षणाया अयोगात्। 'पुरुष एवेदं सर्वं पुरुषेणैव सर्वं व्याप्तमातृणादाकरिषात्' इति श्रुतौ

'असतश्च सतश्चैव सर्वस्य प्रभवोऽप्ययः।

सर्वस्य च सदा ज्ञात्सर्वमेनं प्रचक्षते॥

पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत्।

इत्युच्यते तदीयवान्न तु तस्य स्वरूपतः॥' इति भारते॥

'सर्वं समाप्नोषि ततोऽसि सर्वः' इति गीतायाम् चान्यथाव्याख्यातत्वाच्च।

'यस्मात्परं नापरमस्ति' इति श्रुतेरपि यस्मात्परं नापरमस्ति तच्च किञ्चित् अल्पमित्यर्थः। 'पुरुषान्नापरं किञ्चित्, पादोऽस्य विश्वा भूतानि' इत्यादिश्रुतेः। 'वासुदेवात्परं नास्ति' इत्यादिस्मृतेश्च। 'तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरम्' इति वाक्यशेषाच्च। विश्वस्यैवाभावे हि किं तेन पूर्णं कस्माच्च तदुत्तरं स्यात्। 'यस्मान्नाणीयो न ज्यायोऽस्ति' इत्यत्र तु 'अणोरणीयान् महतो महीयान्' इत्यादिश्रुत्यन्तराद् वाक्यशेषविरोधादुभयत्रापि नञः श्रवणाच्चोभयनिषेधः।

## (पुराणादिषु जगत् असत्यत्वानृतत्वाद्युक्तेस्तात्पर्यम्)

पुराणादिषु क्वचिज्जगतोऽसत्त्वोक्तिरसाधुत्वादेव।

'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यत' इत्यादेश्च।

अश्रद्धया हुतं दत्तं तपस्तप्तं च यद्भवेत्।

असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ इति गीतोक्तेश्च।

'सच्छब्दः साधुवाचकः' इति विष्णुपुराणोक्तेश्च।

अस्वातन्त्र्याद्वा असत्वम्। 'सत्वं स्वातन्त्र्यमुद्दिष्टं तच्चकृष्णो न चापरे। अस्वातन्त्र्यात्तदन्येषामसत्वं विद्धि भारत॥' इति भारतोक्तेः। अवस्तुत्वोक्तिरपारमार्थिकत्वोक्तिश्च परिणामित्वाद् विनाशित्वाच्च,

'यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै।

परिणामादिसम्भूतां तद्वस्तु नृप तच्च किम्॥

अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते॥'

**इति विष्णुपुराणोक्तेश्च।**

मिथ्यात्वोक्तिर्वृथात्वात्। 'मिथ्यैष व्यावसायस्ते' इत्यादिवत्सदोषत्वाद्वा। मिथ्योपपदात् कृञोऽभ्यास इति सूत्रे वृत्तपदं मिथ्या कारयते इत्युदाहृत्य स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थ इत्युक्तत्वात्। न्यासे पदमञ्जर्याम् 'एतेन मिथ्याशब्दस्य अर्थमाचष्ट' इत्युक्तत्वाच्च। अतात्विकत्वोक्तिस्तु विकारित्वात्। 'तद्वदेव स्थितं यत्तु तात्विकं तत्प्रचक्षते' इति कौर्मोक्तेः। अविद्यमानत्वोक्तिस्तु जीवसम्बन्धित्वेनाविद्यमानत्वात्। 'अविद्यमानं जीवस्य प्रतिभाति तदीयवत्' इति स्कान्दोक्तेः।

'द्रव्यं कर्मच कालश्च स्वभावो जीव एव च ।

यदनुग्रहतस्सन्ति न सन्ति यदुपेक्षया॥' इत्युक्तेश्च॥

'ईश्वरीयमिदं सर्वं कोशवित्तधनादिकम्।

स एव कर्ता चेदानीं न मे किञ्चन दह्यति॥'

**इति वायुपुराणोक्तेश्च।**

स्वप्नादिसाम्योक्तिस्त्वनित्यत्वादेव-

'अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः।

स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यता॥' इति वचनात्।

मायामयत्वोक्तिः प्राकृतत्वात्। 'मायां हि प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतेः।

त्रिगुणा प्रकृतिर्माया तज्जत्वाद् विश्वमीदृशम्।

अनाद्यनन्तकालेषु मायेत्याहुर्विपश्चितः॥ इति स्मृतेश्च।

अन्यथा 'स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता' इत्यादिश्रुतिभिः 'न मायेत्यवधार्यताम्' इत्यादिस्मृतिभिः। 'वैधर्म्याच्च न स्वप्नादिवत्' इत्यादि सूत्रैस्तत्रैव पूर्वोत्तरवाक्यैश्च विरोधात्।

'एकाद्वितीयश्रुतयः किन्त्वीशान्तरवारकाः।
तथा स्वगतभेदस्य तदतन्त्रनिषेधकाः॥' इति ब्रह्माण्डे। (भा.ता.10.84.30)

'अभेदो जगतो विष्णोः या वाचो ये च हेतवः।
स्वप्नजाग्रत्कल्पकवत् सर्वे ते भ्रमदर्शिताः॥'

**इति शाश्वतसंहितायाम्।** (**भा.ता**.11.13.31)

'सोऽद्वयः पुरुषस्तस्मान्न समो नाधिको मतः॥'

**इति महासंहितायाम्।** (**भा.ता**11.13.31)

'त्वदधीना यतः सत्ता अवरस्यापि केशव।
अतः स्वरूपतः सम्यक् सति भेदेऽपि....॥' इति माहात्म्ये।
'ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः।
यथाऽवदच्छ्रुतौ तद्वज्जीवो ब्रह्मेति वाग् भवेत्॥'

**इति ब्राह्मे।** (**भा.ता**.2.5.37)

'सदिति व्यक्तमुद्दिष्टम् अव्यक्तमसदुच्यते।
गम्यागम्यस्वरूपत्वात् सदसद्धि हरिर्यतः॥
अतस्तस्मादन्यदेव ह्यनन्यदिति भण्यते॥' इति च ।

'छन्दांसि च मखाश्चैव वेद लोकाश्च सर्वशः।
सर्वे विष्णौ स्थिता यस्मादतः सर्वमयोह्यसौ॥'

**इति महासंहितायाम्।** (**भा.ता**.2.7.21)

'सत्तादिर्यस्त्वितो विष्णोस्तस्मादन्यः स सर्वतः।
यत्सत्तादिरतोऽन्यस्य नान्यत्वं भेदिनोऽपि तु॥'

**इति ब्रह्माण्डे।** (**भा.ता**.2.7.50)

'जनिष्येऽहं भविष्येऽहमिति न ह्यभिसन्धितः।

अतो जीवनमप्येद् भवेदीशाभिसन्धितम्॥

अतः स्वरूपभेदेऽपि ह्यात्मैवेदमिति श्रुतिः।

वदत्यस्येशतन्त्रत्वाद् यथाऽशक्तस्तत्वसन्निति॥

विद्यन्ते हि तदा जीवाः कालकर्मादिकं तथा।

वान्यथा हि पुनः सृष्टिः पूर्वकर्मानुसारिणी॥' इति ब्रह्मतर्के।

'अन्तर्याम्यैक्यवाचीनि वचनानीह यानि तु।

तानि दृष्ट्वा भ्रमन्तीह दुरात्मानोऽल्पबुद्धयः॥' इति च।

'हरौ नियतचित्तत्वात् गृहवत्तत्प्रवेशनात्।

मोहं तादात्म्यमित्याहुर्न तद्रूपत्वतः क्वचित्॥' इति भविष्यत्पर्वणि।

'परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः।

तस्मान्न व्यतिरिक्तत्वं इत्याहुर्वेदवादिनः॥' इति पाद्मे

'स्वातन्त्र्येणान्यतद्भावनिषेधाय श्रुतिस्त्वियम्।

अन्योऽसावहमस्मीति पश्यन्नज्ञ इति स्म ह॥

आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः।

आह तद् ब्रह्मणोऽधीना जीवा भिन्नाः सदैव तु॥'

**इति ब्रह्मतर्के** (**भा.ता.**2.9.33)

'विष्णोरङ्गसमुद्भूताः विष्णोरङ्गानि देवताः।

उच्यन्ते सर्ववेदेषु स्वरूपे भेदिनोऽपि तु॥' इति अग्नेये।

'अधिकस्य समस्यापि स्वतन्त्रस्य च वर्जनात्।

एक एवाद्वितीयोऽसौ न चास्य जनवर्जनात्॥'

**इति कौर्मे।** (**भा.ता.**10.94.30)

# (ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्यर्थः)

"ब्रहैव सन् ब्रह्माप्येति"

'पूर्णानन्दादि तेऽश्नन्ति पूर्णानन्दादिह स्वतः।

ब्रह्मणो ब्रह्मसम्पत्तिमत आह श्रुतिः स्फुटम्॥

न परब्रह्मतावाप्तिर्न ते विष्णो इति श्रुतेः॥

परमब्रह्मता चैषां ब्रह्मलोकात्परा गतिः।

न परब्रह्मरूपत्वं एतमेवेति च श्रुतेः॥' इति ब्रह्मतर्के।

'सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते।

अनन्याधिपतित्वाच्च तदनन्यमुदीर्यते।

न वाप्यभेदो जगता विष्णोः पूर्णगुणस्य तु॥'

**इति हरिवंशे।**(**भा.ता.**11.2.41)

'भूतानामेक एवात्ता एको भूतेषु संस्थितः।

एको भूतानि चाऽदत्ते तस्मादेकात्मकानि तु॥'

**इति बद्रमाने** (**भा.ता.**11.18.33)

'एकः प्रधान उद्दिष्टो विष्णोः प्राधान्यदर्शनम्।

एकात्मदर्शनं प्रोक्तं सर्वज्ञानोत्तमं च तत्॥'

**इति त्रैकाल्ये।**(**भा.ता.**11.19.27)

'यदाऽन्यं न विजानाति नाऽत्मानं नेश्वरं तथा।

पुरुषार्थता कुतस्तु स्यात्तदभावाय को यतेत्॥

अहेयत्त्वादहंनामा भगवान् विष्णुरव्ययः।

ब्रह्मासौर्गुणरूपत्वादस्म्यसावसानान्मितेः॥

असनादिसिनामासौ तेजस्त्वात्वमितीरितः॥'

**इति परमश्रुतिः।**(**गी.ता.**2.28)

## (स्तब्धस्य श्वेतकेतोः भेद एव पित्रा उपदिष्टः)

‘सर्वान् येदानधीत्यैव प्रज्ञाधिक्येन हेतुना।
श्वेतकेतुरहङ्कारात् प्रायशो नास्मि मानुषः॥
देवो वा केशवांशो वा नैषा प्रज्ञान्यथा भवेत्।
एवं महत्त्वबुद्ध्यैवं दर्पपूर्णोऽभ्यगात्पितुः।
सकाशमकृताचारं तं दृष्ट्वा स्तब्धमज्ञवत्॥
पितोवाच कुतः पुत्र स्तब्धता त्वामुपागता।
प्रायो नारायणं देवं नैव त्वं पृष्टवानसि॥
यस्मिन् ज्ञाते त्वविज्ञाते ज्ञानादीनां फलं भवेत्।
प्राधान्यात्सदृशत्वाच्च तदधीनमिति स्फुटम्॥
यथा चैवैकमृत्पिण्डज्ञानादेः सदृशत्वतः।
मृण्मयं तद्विकार्यं च ज्ञातं मृदिति वै भवेत्॥
यदैव मृत्तिकेत्यादिनित्यनामप्रवेदनात्।
वाचारब्धमनित्यं तु ज्ञातं तन्मूलमित्यपि॥
एवं कारणभूतोऽसौ भगवान् पुरुषोत्तमः।
प्रधानश्च स्वतन्त्रश्च तन्मूलमखिलं जगत्॥
तस्मात्तदीयस्त्वमसि नैव सोऽसि कथञ्चन।’

यथा पक्षीत्यारभ्य ‘भिन्नौ स्वभावतो नित्यं नानायोरेकता क्वचित्’ इति परमश्रुतिपर्यालोचनयापि तत्वमसीति वाक्यं नाद्वैतपरम् इति सिद्धम्।

‘पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत्।
इत्युच्यते तदीयत्वात् न तु सर्वस्वरूपतः॥’ इति भारते।

‘एकीभूताः नृपास्सर्वे ववृषुः पाण्डवं शरैः।
एकीभूता पुनः सेना पाण्डवानभ्यवर्तत॥’ इति च भारते।

'एकमेवाद्वितीयं ते विष्णुभक्तिर्हि साधने।
एक एवाद्वितीयोऽसौ प्रणवो मन्त्रउच्यते॥'

**इति हरिवंशे।** (छा.भा.6)

'शरीराभिमानी यो हृदि संस्थो जनार्दनः।
अभिमानवतो देहे जीवस्य स नियामकः।

स एव सूर्यसंस्थश्च हंसः सोऽहमितीरितः॥
हन्तृत्वाद्धंसनामाऽसौ अहं चासावहेयताः॥' इति हरिवंशे।

## (एकमेवाद्वितीयमिति श्रुत्यर्थः)

'एकमेवाद्वितीयं तत् समाधिकविवर्जनात्।
स्वगतानां च भेदानाम् अभावात् ब्रह्म शाश्वतम्॥'

**इति प्रवृत्ते।**(छा.भा.6)

'भेदाभेदनिवृत्यर्थमेवशब्दोऽवधारकः।
समाधिकनिवृत्यर्थमद्वितीयपदं तथा॥'
भेदाभेदेऽप्येकशब्दो यतोऽवयविनि स्थितः।
एकमेवेत्यतः प्राह नारायणमियं श्रुतिः॥'

**इति सामसंहितायाम्।**

'शीर्यते नित्यमेवास्माद् विष्णोस्तु जगदीदृशम्।
रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगत्॥
यस्माद्यज्जायते चाङ्गाल्लोकदेवादिकं हरेः।
तन्नाम वाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखम्॥' इति नारदीये ।

'अस्थूलोऽनणुरूपोऽसावविश्वो विश्व एव च ।
विरुद्धधर्मरूपोऽसावैश्वर्यात्पुरुषोत्तमः॥'

इति ब्राह्मे। (ब्र.सू.भा.1.3.12)

## (यथोदकम् इति श्रुत्यर्थः)

‘यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति’ इति।

उदकं तूदके सिक्तं मिश्रमेव यथा भवेत्।

न वै तदेव भवति यतो वृद्धिः प्रदृश्यते॥

एवमेव हि जीवोऽपि तादात्म्यं परमात्मना।

प्राप्तेऽपि नासौ भवति स्वातन्त्र्यादिविशेषणात्॥

यथा पर्याप्ततेजांसि महातेजसि भास्करे।

पृतक्पृथक् स्थितान्येव स्वरूपैरपि सर्वशः॥

परे ब्रह्मणि जीवाख्यब्रह्मण्यद्यापि यान्ति हि।

मुक्तौ पृथक् स्थितान्येव तदन्येषामदर्शनम्॥

अव्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचित्॥

इति नारायणश्रुतिः॥

## (विष्णवधीनं सर्वमिति यथार्थज्ञानमेवापृथग्ज्ञानम्)

‘विष्णवाधीना जगत्सत्ता प्रतीतिश्चेष्टितं गतिः।

इति यन्निश्चितं ज्ञानमपृथग् दर्शनं स्मृतम्॥

मिथ्याज्ञानं पृथग् ज्ञानमपृथग् दृष्टिरुच्यते॥’

इति गारुडे।(भा.ता.4.8.46)

## (वस्तुस्वरूपानुगुणमैक्यज्ञानमतथाभूतं भेदज्ञानम्)

‘बहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते।

अद्वैतज्ञानमित्येव द्वैतज्ञानं तदन्यथा॥

यथाज्ञानं तथा वस्तु यथा वस्तु तथा मतिः।

नैव ज्ञानार्थयोर्भेदस्तत एकत्वदर्शनम्॥’

## (निन्दितभेदज्ञान (अन्यथाज्ञान) स्वरूपम्)

'भिन्नस्याभेदतो दृष्टिरपि भेददृशिर्मता।
अन्यथाज्ञानमेवातो भेदज्ञानं विनिन्दितम्॥
न विद्यमानभेदस्य दर्शनं निन्दितं क्वचित्।'
'शिला देव इति ज्ञानं देवोऽस्मीति च या मतिः।
असमस्य समत्वेन समस्यासमदर्शनम्॥
द्रवं तीर्थमिति ज्ञात्वा देहोऽहमिति या मतिः।
असद्भार्यादिषु स्वीयदर्शनं चैवमादिकम्॥
भेदज्ञानमिति प्रोक्तं या चान्याऽप्यन्यथामतिः।
तस्मात्तदपहानाय संसेव्या गुरुवो वराः॥'

**इति स्कान्दे।** (**भा.ता**.10.72.12)

'नानात्वमिति वै मिथ्याज्ञानं कुत्रचिदुच्यते।
वस्तुयथात्म्यतोऽन्यत्वाद् ज्ञानस्याल्पे विवक्षितम्॥' इति।

'जीवस्येशत्वविज्ञानं जीवानामेकता तथा।
ईशस्य बहुताज्ञानं ईशस्यान्नाशता तथा।
जगतोऽसत्यताज्ञानं नानात्वभ्रम उच्यते॥'

**इति विवेके ।**(**भा.ता**.11.21.21)

'भिन्नस्य त्वेकभावेन तथैकस्य च भेदतः।
ज्ञानं नानार्थधीः प्रोक्ता नानात्वादर्थतद्धियोः॥' इति ब्रह्मतर्के।

## (पञ्चविधस्तत्वविप्लवो न कार्यः)

'अन्यसाम्यमभेदो वा नीचता वा कुतश्चन।
विष्णोः श्रीपूर्वकाणां च व्यत्यासो गुणदोषतः॥

तद्भक्तेरन्यधर्मत्वं पञ्चैते तत्त्वविप्लवाः।

तत्त्वविप्लावकं शूद्रं वैश्यं क्षत्रियमेव वा।

हन्यादेवाविचारेण विप्रे जिह्वां ततो हरेत्॥' इति च।

'यथैकच्छत्रवान् यद्वत् एकवीर इतीर्यते।

तथैव सर्वप्राधान्याद्द्वितीयो हरिः स्मृतः॥

एवं मुक्ताः सदा ज्ञात्वा स्वाराज्यं प्रापिता विभोः॥' इत्याग्नेये।

'एकदेशस्वभावेन वागभेदाऽपि युज्यते।

यथा जीवः परं ब्रह्म ब्रह्मेदं जगदित्यपि॥'

**इति गारुडे ।** (ब्र.सू.भा.3.1.16)

सर्वावताररूपेषु निर्भेदत्वाददोषतः।

अभिदा विष्णोः समुद्दिष्टा॥

## ('तत्त्वतो भेदः' इत्यस्योपसंहारः)

एवमाद्यनन्तप्रमाणैरीशजगतोर्विरुद्धधर्माधिकरणत्वयुक्तिभिश्च वास्तवभेदस्य सिद्धत्वात् 'तत्त्वतो भेदः' इति लक्ष्मीनारायणमुन्युक्तं सुस्थम्॥

# 4. जीवगणाः हरेरनुचराः

## (ब्रह्मादयः हरेरनुचरा इत्यत्र भागवतप्रमाणोदाहरणम्)

ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः।

देवैः सानुचरैः सार्धं गीर्भिर्विष्णुमथास्तुवन्॥

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।

सत्यस्य सत्यमुत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥

ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगात् वारि निवारयन् फणैः।

मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयौघजवोर्मिफेनिला॥

भयानकावर्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः॥

गोलोकदाव्रजत्कृष्णं सुरभिः शक्र एव च।

विविक्त उपसङ्गम्य व्रीळितः कृतहेलनः॥

पस्पर्श पादायोरेनं किरीटेनार्कवर्चसा॥

दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः।

नष्टत्रिलोकेशमद इदमाह कृताञ्जलिः॥

ये मद्विधाः स्युर्जगदीशमानिनः त्वां वीक्ष्य काले भयमाशु तं मदम्।

हित्वार्यमार्गं प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनम्॥

**इति भागवते।**

## (देवानां विष्णोरनुचरत्वे श्रुत्युदाहरणम्)

'भीषाऽस्माद् वातः पवते। भीषोदेति सूर्यः।

भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति॥' श्रुतिः।

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः।

विदेहि रुद्रो रुद्रियं महित्वं याशिष्टं वर्तिरश्विना इरावत्॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्।

यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥ इत्यारभ्य

'अहं पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे' इति विष्णुपत्न्या अम्भ्रिण्या उक्तत्वात्। तदधीनब्रह्मरुद्रादीनां हर्यनुचरत्वं सिद्धम्।

## (ब्रह्मादीनां हर्यनुग्राह्यत्वे स्मृतिसमाख्य)

ब्रह्मा मरुन्मारुतसूनुरीशः शेषो गरुत्मान् रविजः शक्रकात्याः।

क्रमादनुव्रज्य च राघवस्य शिरस्यथाऽङ्घ्रं प्रणिधाय निर्ययुः॥

स्वं स्वं च सर्वे सदनं सुरा ययुः पुरन्दराद्याश्च विरिञ्चपूर्वकाः।
मरुत्सुतोऽथो बदरीमवाप्य नारायणस्यैव पदं सिषेवे॥

(**म.ता.नि.**9.115)

ऋते भवन्तं न हि तं निहन्ता त्वमेक एवाखिलशक्तिपूर्णः।
ततो भवन्तं शरणं गता वयं तमोनिहत्यै निजबोधविग्रहम्॥
इतीरितस्तैरभयं प्रदाय सुरेश्वराणां परमोऽप्रमेयः।
प्रादुर्बभूवामृतभूरिलायां विशुद्धविज्ञानघनस्वरूपः ॥

(**म.ता.नि** 10.40)

चतुर्मुखेशासुनरेन्द्रपूर्वकैः सदा सुरैः सेवितपादपल्लवः।
प्रकायंस्तेषु सदात्मगुह्यं मुमोद मेरौ च तथा बदर्याम्॥

(**म.ता.नि.**10.86)

एतस्मिन्नेव काले कमलभवशिवाग्रेसराः शक्रपूर्वा।
भूम्यां पापात्मदैत्यैर्भुविकृतनिलयैराक्रमं चासहन्तः।
ईयुर्देवाधिदेवं शरणमजगुरुं पूर्णषाड्गुण्यमूर्तिं ।
क्षीराब्धौ नागभोगे शयितमनुपमानन्दसन्दोहदेहम्॥

(**म.ता.नि.**11.173)

'ब्रह्मादीनागतांश्चैव सदा स्वपरिचारकान्।
पूजयित्वाभ्यनुज्ञाय ब्राह्मणानप्यपूजयत्॥
ब्रह्मेशशक्रप्रमुखाः सुराश्च चक्रुः सुसाचिव्यमनन्तदा स्यात्॥'

**इत्यादि भारततात्पर्ये।**

'स च दण्डधरोऽस्माकं शास्ता कर्ता नियामकः।
न तदुक्तेस्तु प्रत्युक्तिरस्माकं विहिता नृप॥
न राजोक्तेस्तु प्रत्युक्तिर्दृश्यते क्वापि भूतले।
इत्याश्वास्य यमं तेन साकं क्षीराम्बुधिं ययौ॥
ब्रह्मा तुष्टाव चिन्मात्रं निर्गुणं परमेश्वरम्॥

साङ्ख्ययोगैरद्वितीयमेकं तं पुरुषोत्तमम्।

आविरासीत्तदा विष्णुर्ब्रह्मणा संस्तुतो हरिः॥

सपर्यां चक्रतुस्तस्मै यमो ब्रह्मा च सत्वरम्॥' इति स्कान्दे।

'

'निबोध तात मद्वाक्यं वयं शङ्करपूर्वकाः।

बलिं चराम देवाय सदा तद्वशवर्तिनः॥

चक्षुष्मता नीयमानो चक्षुष्मानिव नित्यशः।

ईशदत्तं च भोक्तव्यमसर्वैः किमु चापरे॥

ईश्वरो विपणं कृत्वा जना.... बली।

नासा रज्जुं नाम बद्धा बद्धादान्निगुणात्त्रये॥

पापपुण्यस्य भारं च वाहयत्यनिशं हरिः॥' इति वायुपुराणे।

वसिष्ठं प्रति ब्रह्मवचनम् –

'विष्णुना देवता बद्धा विष्णवे च बलिप्रदाः।

विष्णुरासां पतिर्नित्यं न विष्णोर्बन्धकः क्वचित्॥

**इति वामने। ( बा.ता.नि.10.94.28)**

इत्यादिमानैर्बहुभिर्देवानां हरिभृत्यता।

अनौपचारिकी सिद्धा श्रीपादोक्त्या यथार्थतः॥

## 5. नीचोच्चभावं गताः

## (जीवानामणुत्वेन तारतम्याभावशङ्कापरिहारः)

ननु 'नीचोच्चभावङ्गताः' इत्युक्तमयुक्तम्। संसारदशायां विचित्रकर्मयुतस्य तस्योपपत्तावपि मोक्षे तदभावात्। 'मुक्तिर्नैजसुखानुभूतिः' इत्युत्तरवाक्ये जीवस्वरूपभूतानन्दाविर्भावस्य मोक्षत्वश्रवणात्।

'बालाग्रशतभागस्य शतधा कल्पितस्य च ' इत्याब्रह्मस्तम्बपर्यन्तानां जीवानामणुत्वात् विशेषात्तदतिरिक्तस्य तरतमभावपादकस्याभावात् इति चेत् न । नैजस्येव मौक्तिकस्य नीचोच्चभावस्य अनन्यथासिद्धानन्तमानवेद्यत्वेनापलापायोगात्। तथा हि-

यदन्तरं व्याघ्रहरीन्द्रयोर्वने यदन्तरं मेरुगरीन्द्रबिन्ध्ययोः।
यदन्तरं सूर्यसुरेशबिम्बयोस्तदन्तरं रुद्रमहेन्द्रयोरपि॥
यदन्तरं सिंहगजेन्द्रयोर्वने यदन्तरं सूर्यशशाङ्कयोर्दिवि।
यदन्तरं जाह्नविसूर्यकन्ययोस्तदन्तरं ब्रह्मगिरीशयोरपि।
यदन्तरं प्रलयवारिविप्रुषो यदन्तरं स्तम्बहिरण्यगर्भयोः।
स्फुलिङ्गसंवर्तकयोर्यदन्तरं तदन्तरं विष्णुहिरण्यगर्भयोः।

(गी.भा.2.24)

'ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजः स्मृतः।
सनकाद्यास्तु वाराहे ब्रह्मा विष्णोः सुतोऽग्रजः।

**इति ब्रह्माण्डे।** (**आथ.भा**.1.1)

'ईशमाश्रित्य तिष्ठन्ति मुक्ताः संसारसागरात्।
यथेष्टभोगभोक्तारो ब्रह्मान्ता उत्तरोत्तरम्।' इति परमश्रुतिः।
'तस्मान्नित्यं तु नानात्वं जीवानामीशतन्त्रता।
स्वाधिकानां वशत्वं च मुक्तावपि सदेष्यते।
एवं ज्ञात्वा विमुच्यन्ते परानन्दं भजन्ति वा।'

**इति तन्त्रभारते।** (**भा.ता**.11.10.34)

स्वभावतस्त्रिधा जीवा उत्तमाधममध्यमाः।

## (जीवत्रैविद्यं स्वाभाविकम्)

उत्तमास्तत्र देवाद्या मर्त्यमध्यास्तु मध्यमाः।
अधमा असुराद्याश्च नैषामस्त्यन्यथाभवः।

शरीरमात्रान्यथात्वे स्वजातिं न पुनरेष्यति।

उत्तमा मुक्तियोग्यास्तु सृतियोग्यास्तु मद्यमाः।

अपरेऽन्धन्तमोयोग्याः प्राप्तिः साधनपूर्तितः।

पूर्त्यभावेन सर्वेषामानादिः संसृतिर्मता।

नैव पूर्तिश्च सर्वेषां नित्यं कालहरिच्छया।

अतोऽनुवर्तते नित्यं संसारोऽयमनादिमान्॥

## (जीवेषु पुंस्त्र्याद्या जातयः नित्याः)

'स्वाभाविको ब्राह्मणादिश्शमाद्यैरेव भिद्यते।

योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम्॥'

**इति नारदीये।** (**गी.ता**.4.13)

'यान्ति स्त्रीत्वं पुमांसोऽपि पापतः कामतोऽपि वा।

न स्त्रियो यान्ति पुंस्त्वं तु स्वभावादेव याः स्त्रियः।

पुंसा सहैव पुंदेहे स्थितिः स्याद्वरदानतः।

सर्वेषामपि जीवानां तत्तद्देहो यथा निजः।

मुक्तौ च निजभावः स्यात् कर्मभोगान्ततोऽपि च॥'

**इति भविष्यत्पर्वणि।** (**गी.ता**.9.34)

देवासुरानरत्वाद्या जीवानां तु निसर्गतः।

निसर्गो नान्यथैतेषां केनचित्क्वचिदेव वा।

देवा शापबलादेव प्रह्लादादित्वमागताः।

अतः पुनश्च देवत्वं ते यान्ति निजमेव तु।

हेतुतःसोऽन्यथाभावो रक्तता स्फटिके यथा।'(गी.ता.16.1.24)

'असुरादेस्तथा दोषाः नित्याः स्वाभाविका अपि।

गुणदोषौ मनुष्याणां नित्यौ स्वाभाविकौ मतौ।

गुणैकमात्रसूपास्तु देवा एव सदा मताः।'

इति ब्राह्मे। (गी.भा.6.9.)

## (मुक्तौ स्वाभाविकाः गुणाः व्यज्यन्ते संसारे पुनरौपाधिका अनुभूयन्ते)

‘नित्यानन्दज्ञानबला देवा नैवं तु दानवाः।

दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः।

तेषां यदन्यथा दृश्यं तदुपाधिकृतं मतम्।

तमोधनानां जीवानां मिथ्याज्ञानादयोऽखिलाः।

स्वाभाविकगुणा ज्ञेया मर्त्यमध्येषु मिश्रिताः।

तत्त्वज्ञानं विष्णुभक्तिरित्याद्या दैवतादिषु।

कार्यते ह्यवशं कर्म सर्वस्तैः प्राकृतैर्गुणैः।

स्वाभाविकगुणानेतान् हेतुं कृत्वैव विष्णुना।

कर्मसु क्रियमाणेषु कर्ताहमिति मूढधीः।

मन्यते तत्त्वविद् विष्णौ गुणा इच्छादयस्तु ये।

तान् गुणान् कर्म तत्रैव विष्ण्वधीनं न ते विदुः।

तेष्वयोग्येषु तत्त्वज्ञस्तत्वं नातिप्रकाशयेत्।

वदेद् विवादरूपेण नोपदेशादिना क्वचित्।

सभारूपेण वा ब्रूयात् पृष्टव्यक्तिकृदेव वा।

बुद्ध्वाप्यसौ मतो नित्यं स्वभावान्यङ्गचेष्टितः।

स्वभावं यान्ति भूतानि निग्रहः किं गरिष्यति।’

इति प्रकाशसंहितायाम्। (गी.ता.3.35)

दूरीकृतप्रमाणत्वात् ऊर्म्यः स भगवान् हरिः।

वृकास्तेनैव निर्याप्या वृकाः क्रूरत्वतोऽसुराः।

तत्स्वभावाश्च वृक्यास्युस्तेनास्तत्र महासुराः।

ब्रह्मस्तेना यतस्ते हि नित्यमैकात्म्यवादिनः।’ इत्यैतरेयसंहितायाम्।

(ऐ.भा.2.8)

'तेषां यदन्यथा दृश्यं तदुपाधिकृतं मतम्।
विज्ञानेनात्मयोग्येन निजरूपे व्यवस्थितिः।
सम्यग्ज्ञानंतु देवानां मनुष्याणां विनिश्चितम्।
विपरीतं तु दैत्यानां ज्ञानस्यैवं व्यवस्थितिः।

**इति भविष्यत्पर्वणि।** (**ब्र.सू.भा**.2.3.32)

## (त्रिविधजीवसद्भावे ब्रह्मदर्शनमेव मानम्)

'नारायणप्रसादेन समिद्धज्ञानचक्षुषा।
अत्यन्तदुःखसल्लीनान् निःशेषसुखवर्जितान्।
नित्यमेव तमोभूतान् विमिश्रांश्च गणान् बहून्।
निरस्ताशेषदुःखांश्च नित्यानन्दैकरूपिणः।
अपश्यत् त्रिविधान् ब्रह्म साक्षादेव चतुर्मुखः।'

**इति पाद्मे।** (**ब्र.सू.भा**.2.3.32)

'असुरा आसुरेणैव स्वभावेन च कर्मणा।
ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात्।
देवा देवस्वभावेन कर्मणा चाप्यसंशयम्।
सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम्।
नानयोरन्यथाभावः कदाचिद् विद्यते क्वचित्।
मानुषा मिश्रमतयो विमिश्रगतयोऽपि च।' इति स्कान्दे।

'आसुरान् दमयन् विष्णुः स्वपदं च सुरान्नयन्।
पुनः पुनर्मनुष्यांस्तु सुतावावर्तयत्यसौ।'

**इति च भविष्यत्पर्वणि।** (**ब्र.सू.भा**.3.4.38)

## (देवानामसुरत्वम् असुराणां देवत्वं वा न भवति)

'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च

गतिमीयुरात्मीयामेव जातिमनुभवन्ति॥' इति श्रुतिः।

'नासुराणां दैवं रूपं न देवानामासुरं रूपं न चोभयम्

मनुष्याणां यो यद्रूपः स तद्रूपो  निसर्गो ह्येष भवति।

तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि

सुप्तो भूर्भूवरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुः।

**इति ऐतरेये (ब्र.सू.भा.** 3.4.40)

'देवानां भूतिरित्येव मनो विष्णौ स्वभावतः।

असुराणामभूतित्वे नैतन्नेयमतोऽन्यथा।' (ब्र.सू.भा.3.4.40)

'स्वरूपज्ञानतो भोगान् मुक्तौ भुङ्क्ते यथेष्टतः।

स्वाधिकानां वशत्वं तु तेषु भक्तिमतः सुखम्।

तदन्येषां तु दुःखाय तस्माद्भक्तोऽधिको भवेत्।' इति गारडे।

'जीवो मुक्तोऽपि नो जीवान् परमात्मानमेव च ।

वेत्ति सर्वात्मना विष्णुर्वेत्येकः पुरुषोत्तमः।

तस्य प्रसादतः किञ्चित् ब्रह्माद्या अपि जानते।

अन्यजीवानपेक्ष्यैको जानाति तु चतुर्मुखः।

सामस्थ्येन तदन्ये तु लेशज्ञानाः क्रमात् स्मृताः।' इति विनिर्णये।

'गुणव्यतिकराभावेऽप्युच्चनीचादि पूर्ववत्।

विष्णोश्चैव विमुक्तानां न कदाचिन्न गच्छति। इति गारुडे।

नानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्मधियां विरोधः।

दोषाभावाद् गुरुशिष्यादिभावात् लोकेऽपि नासौ किमु तेषां विमुक्तौ। इति च श्रुतिः।

'श्रद्धास्वरूपं जीवस्य तस्माच्छ्रद्धाविभेदतः।

उत्तमाधममध्यास्तु जीवा ज्ञेयाः पृथक् पृथक्।' (गी.भा.173)

देवा इन्द्रो विरिञ्चाद्या इति त्रेधैव देवताः।

क्रमोत्तराः शिवो वाणी ब्रह्मा चैवोत्तरोत्तराः।

सत्वसत्वमहासत्वसूक्ष्मसत्वश्चतुर्मुखः।

तस्माद् यावद् विमुक्तिः स्यात् मुक्तावेवं सुखक्रमः। इति पाद्मे।

.....भ्याधिको ब्रह्मा सर्वेभ्यः परमो विभुः।

ज्ञानयोग्येश्वरः शेषस्तस्माद् ब्रह्मा चतुर्मुखः। इति च।

## (मुक्तियोग्येष्वधिकारित्रैविध्यम्)

मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः।

तत्र मन्दा मनुष्येषु य उत्तमगणा मताः।

मध्यमा ऋषिगन्धर्वाः देवस्तत्रोत्तमा मताः।

इति जातिकृतो भेदस्तथान्यो गुणपूर्वकः।

भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान्नरः।

अधमः शमादिसंयुक्तो मध्यमः समुदाहृतः।

आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम्।

विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः।

स उत्तमोऽधिकारी स्यात् सन्न्यस्ताखिलकर्मवान्।’

**इति भागवततन्त्रे।** (**ब्र.सू.भा**.1.1.1.)

‘अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः।

स्त्रीशूद्रब्रह्मबन्धूनां तन्त्रज्ञानेऽधिकारिता।’

इति व्योमसंहितायाम्।

‘अधमाधिकारिणो मर्त्या मध्या ऋष्यादिका मताः।

अधिकार्युत्तमाः देवा प्राणस्तत्रोत्तमो मतः।’ इति च।

'यथा तथैवासङ्ख्येयाः प्रजास्तासु कियान् जनाः।
ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकसंश्रयः।
अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते।
गुरुभक्तिविहीनस्य शमादिरहितस्य च ।
न च वर्णवरस्यापि तस्माद्ध्ययनान्वितः।
ब्रह्म ज्ञाने तु वेदोक्ते ह्यधिकारी सतां मतः।' इति ब्रह्मतर्के।

## (आदिसृष्टौ पूर्वजाः सदा गुणाधिकाः)

'आदिसृष्टौ पूर्वजा ये तेऽधिकाः सर्वदा गुणैः।
अनाद्यनन्तकालेषु मुक्तवापि यथाक्रमम्।' इति निबन्धने।

'विष्णोर्ब्राह्मणजातिः सन् जज्ञे ब्रह्मा चतुर्मुखः।
इतोऽग्रे जगतस्तस्मात् क्षत्रजातिरजायत।
वायुः सदाशिवोऽनन्तो गरुडः शक्र एव च ।
कामश्च वरुणश्चैव सोमसूर्यो यमस्तथा।
एवमाद्याः क्षत्रियास्तु वा ब्रह्मविनिर्मिताः।'

**इति वामने।** (**बृह.भा.**3.5)

## (जीवेश्वपि प्राण उत्तमः)

प्राण एवैनमनुप्रविशति प्रणमितरा देवताः।
न प्राणादपरः परमेऽनुप्रविशन्ति प्राण एवैनमनुभुङ्क्ते।
प्राणमितरा देवता न प्राणादपरः परमनुभुङ्क्ते।
प्राण एवैनमन्वानन्दी भवति प्राणमितरा देवताः।
न प्राणादपरः प्रमन्वानन्दी भवति तस्मादाहुः प्राणः पद्धतिः।'

**इति हिरण्यनाभश्रुतिः।**

## (वायोर्जीवोत्तमत्वमवतारादिकं च सदानुसन्धेयम्)

‘सर्वदेवोत्तमो वायुरिति ज्ञानान्न चापरम्।

प्रियमस्ति हरेः किञ्चित् तथा वायोर्हरेर्विदः।

**इति माहात्म्ये।(भा.ता.**11.13.43)

‘वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणिनां प्राणभूतः।

अनावृत्तिर्देहिनां देहपाते तस्माद् वायुर्देवदेवो विशिष्टः॥’

**इति भारते**

‘सर्वेषां प्रेरको ह्येको ज्ञानानन्दबलैस्त्रिवृत्।

नित्यशक्तिस्सर्वगः सन् बहुदैव प्रतीयते।

तस्मिन्नोतमिदं सर्वं पटे लक्षणतन्तुवत्।

स एव वायुरुद्दिष्टो वायुर्हि ब्रह्मतामगात्।’ इति तन्त्र भागवते।

‘सर्वे मुक्ता हरौ भक्तास्तेषु ब्रह्मैव मुख्यतः।

विष्णोः परमभक्तस्तु तस्माज्जीवघनो मतः’ इति सत्तत्वे।

‘ऋजवो नाम ये देवा योग्या ब्रह्मपदस्य तु।

त एव शतजन्मानि विशेषोपासका हरेः।

प्राप्य ब्रह्मपदं पश्चात् श्रियं प्राप्यानुमोदिताः।

तया ततो हरिं यान्ति वसन्ति हरिसन्निधौ।’

**इति षाड्गुण्ये।(भा.ता.**4.14.29)

‘न देवपदमन्विच्छेत् कुत एव हरेर्गुणान्।

इच्छन् पतति पूर्वस्मादधस्ताद्यत्र नोऽस्थितिः।

**इति ब्रह्माण्डे। (ब्र.सू.भा.**3.4.41)

स्वकीयमिच्छमानं तु राजाद्याः पातयन्ति हि।

एवमेव सुराद्याश्च हरिश्च स्वपदेप्सुकम्।

न दैवानभिकाङ्क्षेत कुत एव हरेर्गुणान्।

प्राजापत्यान्न चार्षांश्च गन्धर्वादीनपि क्वचित्।'

**इति बृहत्संहितायाम्।**(**ब्र.सू.भा**.3.4.41)

## (देवानां दुःखमसुरावेशतः, सुखमपि दैत्यानां देवावेशात्)

देवानां पुण्यपापाभ्यां सुखमेवोत्तरोत्तरम्।

तेषां दुःखादिकं किञ्चिदसुरावेशतो भवेत्।

प्राणस्य नासुरावेश आखणाश्मसमो हि सः।

सम्पूर्णानुग्रहात् विष्णोः प्राणः पूर्णगुणो ह्यतः।

असुराणां सुखाद्याश्च देवावेशादुदीरिताः।

स्वतस्तु निर्गुणाः सर्वे सर्वदोषात्मका मताः।

**इति ब्रह्मतर्के।** (**भा.ता**.11.3.49)

## (देवेषु तारतम्यं विज्ञेयम्)

शच्या इन्द्रस्ततश्चोमा तस्या रुद्रस्ततस्तथा।

भारती प्राण एवास्यास्ततः श्रीस्तत्परो हरिः।

**इति वैशेष्ये।** (**भा.ता**.11.16.13)

'सर्वेषां मनसो नेता मनोरूपस्त्रिलोचनः।

तद्वशाः सर्वदेवाश्च ते नैव सुखदुःखिनः।

नियन्ता तस्य च प्राणः ततोऽपि बलवत्तरः।

तन्नियन्ता हरिः साक्षात् परमानन्दलक्षणः।' इति तात्पर्ये।

## (भक्तानां तारतम्यम्)

'केचिदुन्मादवद् भक्ताः बाह्यलिङ्गप्रदर्शकाः।

केचिदान्तरभक्ताः स्युः केचिच्चैवोभयात्मकाः।

मुखप्रसादाद् दार्ढ्याच्च भक्तिर्ज्ञेया न चान्यतः।' इति वाराहे।

'चित्तद्रवस्तथा धैर्यं प्रसादो भक्तिलक्षणम्।
आधिक्येन तु तत्रापि स्थैर्यमेव विशेषतः।
अत अध्यात्मिकैः क्लेशैरधिभूताधिदैवतैः।
वाक्यैश्च वेदतन्त्राद्यैरुपदेशैश्च तादृशैः।
बलवच्छासनैर्वापि यस्य भक्तिर्न चाल्यते।
स एव परमो धर्मो विष्णोर्हृदयवल्लभः।' इति भक्तिविवेके।

'अश्रुत्वापि प्रमाणं यो वासुदेवैकसंश्रयः।
स निर्गुणो भागवतः स निर्दिष्टो मनीषिभिः।' इति च

## (श्रिय आरभ्य मनुष्योत्तमपर्यन्तं गुणविशेषैर्विष्णुरूपास्यः)

'पतित्वेन श्रियोपास्यो ब्रह्मणा मे पितेति च ।
पितामहतयान्येषां त्रिदशानां जनार्दनः।
प्रपितामहो मोऽस भगवानिति सर्वजनस्य तु।
गुरुः श्रीब्रह्मणोः विष्णुः सुराणां च गुरोर्गुरुः।
मूलभूतगुरुः सर्वजनानां पुरुषोत्तमः।
गुरुब्रह्माऽस्य जगतो दैवं विष्णुः सनातनः।
इत्यवोपासनं कार्यं नान्यथा तु कथञ्चन।' इति वाराहे।

'सर्वे गुणाः ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः।
ज्ञानं चोपासनं चैव मुक्तावानन्द एव च।
यथाधिकारं देवानां भवत्येवोत्तरोत्तरम्॥' इति।

'यथा श्रीर्नित्यमुक्तापि प्राप्तकामापि सर्वदा।
उपास्ते नित्यशो विष्णुं एवं भक्तो हरेर्भवेत्।'

**इति बृहत्तन्त्रे।**(ब्र.सू.भा.3.3.41)

'बाह्वोर्बलाधिको यश्च क्षत्रियो विद्ययाधिकः।

विप्रो भागवतो चैतो सेषा लोकास्तयोरिमे।' इति व्यासस्मृतौ।

## (योग्यतातिरेकेण पूजा दुःखदा)

'समानां विषमा पूजा विषमानां समा तथा।

क्रियते येन देवोऽपि स्वपदाद् भ्रश्यते हि सः।'

**इति ब्राह्मे।** (गी.भा.6.9)

'वित्तं बन्धुर्वयः कर्म विद्या चैव तु पञ्चमी।

एतानि मान्यस्थानानि गरीयो ह्युत्तरोत्तरम्।

गुणानुसारिणीं पूजां समां दृष्टिं च यो नरः।

सर्भूतोष कुरुते तस्य विष्णुः प्रसीदति।

यद्यधर्मः कृतः सद्भिः न स वाच्यः कथञ्चन।

असत्कृतमधर्मं तु वदन् धर्ममवाप्नुयात्।'

**इति व्यासस्मृतौ।**(भा.ता.1.17.22)

'सतां वृद्धिकरो धर्मस्त्वसतां ह्रासकारणम्।

अयं तु निश्चितो धर्मो ह्यधर्मोऽन्यो विनिश्चयात्।

न प्रशंस्येत निन्द्यांस्तु प्रशंस्यान्नैव निन्दयेत्।

उभयं यः करोत्येतदसत्यात्स पतेदधः।

यः प्रशंस्यान्न प्रशंस्येन्निन्द्यो येन न निन्द्यते।

सोऽपि तद्वदधो याति यतेरिव उदासकः।

**इति संस्कारे।**

'प्रारम्भमात्रमिच्छा वा विष्णुधर्मे न निष्फला।

न चान्यधर्माकरणदोषवान् विष्णुधर्मकृत्।' (गी.ता.2.40)

'तत्प्रीत्यर्थं विनान्यस्मै नोदबिन्दुं न तण्डुलम्।

दद्यान्निराशीश्च सदा भवेद्भक्तश्च केशवे।

न तत्समोऽधिको वापि कुर्याच्छङ्कामपि क्वचित्।

जानीयात्तदधीनं च सर्वं तत्तत्ववित्सदा।

यथाक्रमं तु देवानां  तारतम्यविदेव च ।

एष भागवतो मुख्यः त्रेतादिषु विशेषतः।

एष धर्मोऽतिफलदो विशेषेण पुनः कलौ।

एवं भागवतो यस्तु स एव हि विमुच्यते।

विष्णुर्बन्धुः सतां नित्यं परात्मा ह्यसतामपि।

तत्प्रसादजया भक्त्या जितो यस्य वशे त्विह।

वर्तते पश्य मित्रं स तदन्यस्य तु शत्रुवत्। इति नारदीये।

## (विहितं कर्म अपरोक्षिभिरपि कार्यमेव)

'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः।

एतादृशोऽपि नाऽचारं श्रौतं स्मार्तं विवर्जयेत्।'

**इति हरिवंशे ।** (**ब्र.सू.भा**.3.4.30)

'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन्।

यदात्मानः सुनियतमानन्दोत्कर्षमाप्नुयात्।'

**इति श्रुतिः ।** (**ब्र.सू.भा**.3.4.32)

'ज्ञानान्मोक्षो भवत्येष सर्वकार्याकृतोऽपि तु।

आनन्दो ह्रसतेऽकार्यात् शुभं कृत्वा तु वर्धते॥'

**इति ब्रह्माण्डे ।** (**ब्र.सू.भा**.3.4.33)

'सर्वदुःखनिवृत्तिस्तु ज्ञानिनो निश्चितैव हि।

उपासया कर्मणश्च भक्त्या चानन्दचित्रता।' इति बृहत्तन्त्रे।

'महाभाग्यं तु कैवल्यम् अज्ञानां कः प्रदास्यति।
अतः सन्तो विजानन्ति तं हरिः त्वनहङ्कृताः।'

**इति स्कान्दे।** (**भा.ता.**10.94)

निषिद्धकामयुक्तानाम् असतां तु विशेषतः।
दुर्ज्ञेयो भगवान् विष्णुः हृदिस्थः स्मृतिहारवत्।
अकामत्वेन भजतां ददात्यभयमन्तकात्।

**इति ब्रह्मतर्के।**

दुष्टसङ्गाद्धि विष्णोश्च स्वात्मत्वं मन्यतेऽबुधः।
अभावं स्वात्मनोऽन्यस्य मुक्तिं चापि निरात्मताम्।

**इत्यादि स्कान्दे।**(**भा.ता.**10.94.35)

'ईषद्भक्तो सुकर्मा स्वर्गमेष्यति।
अभक्तो निरयं याति सुकर्माऽपि न संशयः।'

**इति वामने।**(**भा.ता.**3.33.3)

'अन्यसामान्यवेत्तारस्तदन्योत्तमवेदिनः।
तद्भक्तनिन्दकाश्चैव यान्त्येव निरयं ध्रुवम्।
अपि धर्मैकनिलयाः नात्र कार्या विचारणा॥' इति च।

'तद्भक्तिवर्जिता ज्ञेया ये मन्यन्ते दुराशयाः।
तेषामन्ते तमो घोरमनन्तं प्राप्यते ध्रुवम्।' इति च।

'असुरा अपि ये विष्णुं शङ्खचक्रधरं रणे।
भक्तिपूर्वमवेक्षन्ते ज्ञेया भागवता इति।
विद्विषन्ति तु ये विष्णुमृषिपुत्रा अपि स्फुटम्।
असुरास्तेऽपि विज्ञेया गच्छन्ति च सदा तमः।
जीवद्वयसमावेशाद् हिरण्यकमुखाः परे।
भक्तिद्वेषयुताश्च स्युर्गतिस्तेषां यथा निजाम्।

कंसपूतनिकाद्याश्च बन्धवादियुता यतः।

जीवद्वयसमावेशाद् गतिद्वयजिगीषवः।

सर्वथा भक्तितो मुक्तिर्द्वेषात्तम उदीरितम्।

नियमस्त्वनयोर्नित्यं मोहायान्यद्वचो भवेत्।

**(इति ब्रह्मवैवर्ते। (भा.ता.**3.2.24)

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च" इत्यारभ्य "मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" इत्युक्तं गीतायाम्।

## (भक्तानां नैव दुःखमभक्तानां सुखं न च )

'वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु।

भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथोत्तरैः॥' (भा.ता.7.1.26)

'विमुक्तावपि कामिन्यो विष्णौ कामा व्रजास्त्रियः।

द्वेषिणश्च हरौ नित्यं द्वेषेण तमसि स्थिताः॥'

**इति हरिवंशे।(भा.ता.**7 **अथवा** 10)

'भयादपि हरिं भक्त्या चिन्तयन् तत्त्वरूपिणम्।

पेशस्करिवदायाति द्विषन् द्वेषस्वरूपताम्।

सुखरूपश्च हि द्वेषो दुःखरूप उदीर्यते।

तस्माद्दुःखं सदा याति द्वेषवान् पुरुषोत्तमे।

नृसिंहद्वेषते दुःखं रक्षोरूपेण रावणः।

अगाच्चरमविद्वेषं शिशुपालस्तथैव च ।

ततो भक्त्यापरं यातो द्वेषरूपी त्वधोगते।

तस्मात्सर्वगुणोद्रेकी विद्वेषात्सर्वदोषवान्।

भवेदिति स्वरूपत्वं द्वेषादेः पुरुषस्य हि।'

**इति भागवततन्त्रे । (भा.ता.**7 **अथवा** 10)

‘तं भूतिरिति देवा उपासाञ्चक्रिरे इत्यादि।
मधुकैटभौ भक्त्याभावाद्दूरौ भगवतो मृतौ।
तम एव क्रमादाप्तौ भक्त्याऽवेद्यो हरिं ययौ।’

**इति स्कान्दे।** (**भा.ता.**7.10.23)

‘पौण्ड्रके नरके चैव साल्वे कंसे च रुग्मिणि।
आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमीयिरे।
असुरास्तु स्वयं ये तु महातमसि पातिताः।’ इति च।

‘पूतनाकेशिनरकशिशुपालेषु यद् द्विधा।
जीवाः सन्तो ह्यसन्तश्च सतो बन्ध्वादिरूपिणः।
विष्णोः सन्त इति ज्ञेयाः असन्तः शत्रुरूपिणः।
शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः।
विपर्ययेऽन्यथा च स्युः शुभास्तत्र हरिं ययुः।
असुरास्तु तमो घोरं यदि तत्रैव मध्यमाः।
मध्यमां गतिमेवाऽपुरेकदेहगता अपि।’

**इति गारुडे।** (**भा.ता.**10.5.1)

‘न तु ज्ञानमृते मोक्षो नान्यः पन्थेति हि श्रुतेः।
कामयुक्ताः सदा भक्तिं ज्ञानं चातो विमुक्तिगाः।
अतो मोक्षेऽपि चैतासां कामो भक्त्यानुवर्तते।
कामस्त्वशुभकृच्चापि भक्त्या विष्णोः प्रसादकृत्।
द्वेषिजीवयुतं चापि भक्तं विष्णुर्विमोचयेत्॥
अतोऽतिकरुणा विष्णोः शिशुपालस्य मोक्षणात्॥
त्र्यंशो वेनः समुद्दिष्टः सत्वांशः पृथुतामगात्।
रजोऽशस्तु दिवं प्राप निषादस्तामसोऽभवत्।
स्वयं वेनश्चतुर्थस्तु महातमसि पातितः।

**इति महाकौर्मे।** (**भा.ता.**4.13.43-45)

‘पापरूपं पृथग्जातं निषादं वेनदेहतः।

यस्मात्तस्मात् पृथोः पुत्रात् रजो वेनो दिवं ययौ।’

**इति गारुडे।**

## (हरेस्त्यागोऽनेकविधः न कार्यः)

‘न विद्यया फलं तस्य श्रुतं च नरकावहम्।

नैव प्राप्नोति सुकृतं सन्त्यागात्परमात्मनः।

मुख्यत्यागो हरेरेष यन्नास्तीति वदेदनु।

तत्समं वाऽधिकं वाऽपि ब्रूयादैक्यमथापि वा।

ऐश्वर्यादिगुणानां च ह्रासं नास्तित्वमेव च ।

तत्प्रसादं विना मोक्षं ब्रूयाद् वा कस्यचित्कचित्।

अचिन्त्यविभवे ह्यस्मिन् न सम्भवनिरूपणम्।

स एष मुख्यतस्त्यागो वासुदेवस्य कीर्तितः।

रमाब्रह्मादिकानां च तारतम्यानभिज्ञता।

संशयश्चोक्ततत्त्वेषु जगन्मिथ्यात्वदर्शनम्।

अस्मृतिर्वासुदेवस्य तद्भक्तानां विनिन्दनम्।

द्वितीय एष त्यागस्तु विष्णोरेव प्रकीर्तितः।

निषिद्धकर्मकरणं विहितस्य च वर्जनम्।

त्यागस्तृतीयो हि हरेश्चतुर्थोऽयोग्यपुरुषे।

उपदेशः केशवस्य यथाशास्त्रोदितः क्वचित्।

आचार्यपित्रोरन्यत्र तथैव च महाव्रते।

होत्रुद्गात्रध्वर्यवाणीत्याग एव चतुर्थकः।

त्यागद्वयात् प्रथमात्तु प्राप्यतेऽन्धन्तमः क्रमात्।

पुनरावृत्तिहीनं च तमोऽन्धं मुक्तिरेव च।

पूर्वं तु निःसुखं तत्र निर्दुःखं चापरं मतम्।

निःशेषगुणहीनं च पूर्वनिर्दोषकं परम्।

तृतीयान्निरयं याति चतुर्थान्न दिवं व्रजेत्।'

**इति तन्त्रसारे।** (**ऐ.भा.**3.8)

## (गुर्वनुग्रहादेव साधनजातं सफलम्)

'विद्याकर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः।

अन्यथा नैव फलदाः प्रसन्नोक्ताः फलप्रदाः।' इति च ।(भा.ता.6.8.43)

'प्राकृतैर्दृश्यमानं तु न द्रवं तीर्थमुच्यते।

देवाश्च न शिलामात्राः किन्तु तत्रान्तरस्थिताः।

गुरूपदेशं तु विना न तैर्दृश्यः कथञ्चन।

न ज्ञायते च तद्रूपं अन्यथा ज्ञानिनां च ते।

कोपाच्छापं प्रयच्छन्ति तस्माद्गुरुमुपव्रजेत्।

तस्मात्तीर्थानि देवाश्च नित्यं विद्वत्सु संस्थिताः।'

**इति गारुडे** (**भा.ता.**10.72.11-13)

'तस्मात्पूजा विशेषेण सतां कार्या नृणां सदा।

भक्तिस्तु तारतम्येन विशिष्टेष्वधिका भवेत्॥' इति स्कान्दे।

'गुरोरनुग्राहमृते साधनं न हरेः प्रियम्।

गुरूपदेशात्तु हरिं प्राप्नोत्येव न संशयः॥

## (सम्पूर्णगुरुलक्षणसम्पन्नः चतुर्मुख (मुख्यप्राण) एव)

'षण्णवत्यङ्गुलश्चैव वाग्मी सन्देहवर्जितः।

वासुदेवैकशरणो गुरुरित्युच्यते बुधैः।

षण्णवत्युङ्गुलो यस्तु न्यग्रोधपरिमण्डलः।

सप्तपादः चतुर्हस्तो द्वात्रिंशल्लक्षणैर्युतः।
असंशयः संशयच्छिद्गुरुरुक्तो मनीषिभिः।
गुरुलक्षणसम्पूर्णः साक्षादेव चतुर्मुखः।
ततः शेषेन्द्रवह्न्याद्याः क्रमेणैव प्रकीर्तिताः।'

**इत्यादिविवेके।** (**भा.ता**.10.94.35)

'एकस्मात्तु गुरोर्ज्ञानं जायते नैव कस्यचित्।
एकस्मादेव जायेत योग्याद् ब्रह्मपदस्य तु।
ज्ञानं प्राप्य बहुभ्योऽपि नर्ते मुक्तिश्चतुर्मुखात्।
ज्ञानमप्राप्य तेषां तु ज्ञानादो विष्णुरेव च ।'

**इति गुरुविवेके।** (**भा.ता**.11.9.31)

'सनकादयो रुद्रशिष्यस्तेषामन्ये तु योगिनः।
ब्रह्मशिष्यस्तथा रुद्रो ब्रह्मा नारायणस्य च ।'

**इति ब्राह्मे।**(**भा.ता**.4.4.15)

'मुमुक्षवो ब्रह्मणश्च शिवादिन्द्रादिभिस्तथा।
श्रुत्वा ज्ञानं परं गुह्यं मुच्यन्ते ब्रह्मणा सह।'

**इति कौर्मे** (**भा.ता**.4.7.7)

'गुरुप्रसादो बलवान्न तस्माद् बलवत्तरः।
तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये।
अतीवनिन्दितमपि बहुहिंसायुगेव वा।
सतां येनोपकारः स्यात्तत्कृत्वा नैव दुष्यति।
अथवा ज्ञानिनः कर्म न दुष्टमपि लिप्यते।'

**इत्यध्यात्मे** (**भा.ता**.4.26.7)

'सर्वब्रह्मत्ववेत्तारो जीवब्रह्मत्ववेदिनः।
अन्यसाम्यविदो विष्णोः विष्णुद्वेष्टार एव च।

सर्वे यान्ति तमो घोरं न ताषमुत्थितिः क्वचित्।'

**इति स्कान्दे ।(भा.ता.3.11.13)**

## (विष्णोस्तद्गुणादीनां भेददर्शनं भेदाभेददर्शनं वा हानिकारकम्)

'ब्रह्मणस्तद्गुणानां च भेददर्श्यधरं तमः।
भेदाभेदप्रदर्शीच मध्यमं तु तमो व्रजेत्।
इषद्भेदप्रदर्शी च तम एवोत्तरं व्रजेत्।
विजानीयात्ततो ब्रह्म सदातनमनन्तकम्।
गुणानां च विशेषोऽस्ति न विभेदः कथञ्चन।
ते च सर्वे गुणाः पूरणास्तच्छरीरः परः स्मृतः।
आनन्दज्ञानशक्त्यादेर्हीनं विष्णुं च ये जनाः।
अदेहं भूतदेहं वा विदुस्ते चाधरं तमः।
तथा प्राकृदेहज्ञाः कर्मदेहविदोऽपि वा।
तस्मादानन्दचिद्देहं चिदानन्दशिरोमुखम्।
चिदानन्दभुजज्ञानसुखैकपदसाङ्गुलम्।
आकाशादानखेभ्यश्च पूर्णचित्सुखशक्तिकम्।
प्रत्येकं तु गुणांस्तांस्तु सदा सर्वगुणात्मकम्।
ज्ञात्वा विमुच्यते विष्णोः प्रसादान्मानुषोऽपि सन्।'

**इति पैङ्गीश्रुतिः। (बृह.भा.अ.3)**

## (नीचोच्चता नापगच्छति)

'इयं नीचोच्चता क्वापि न केनापि ह्यपोदितुम्।
शक्यते योऽन्यथा कर्तुं इच्छेत्सोऽपि तमो व्रजेत्।
हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना।
शिष्याणां स्वगुरौ नित्यं शूद्राणां ब्राह्मणादिषु।

भृत्यानां स्वामिनि तथा हरिदास्यमितीर्यते।' इति हरिवंशे।

'ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिव।
परमात्मानमाविश्य वारिस्थं तत्समत्वतः।
अग्निस्थतद्युताश्चैव तेन नीताश्च वायुगम्।
नभोगतं तेन नीतामनस्थं तद्युतास्तथा।
ततो बुद्धिस्थमीशेशं ततोऽहङ्कारगं हरिम्।
ततो विज्ञानमानन्दमहत्तत्वगतं हरिम्।
तत आनन्दनामानमव्यक्तस्थं जनार्दनम्।
प्राप्ता नाऽवृत्तिमायान्ति शान्तीभूता निरामयाः।
अनावृत्तिमसम्मूढाः परानन्दैकभागिनः।'

**इति ब्रह्मतर्के** (**भा.ता**.2.3.34)

## (पशु-वृक्ष-स्थावर-मनुष्योत्तमादिभेदेन स्थितेषु जीवसङ्घेषु नीचोच्चता स्वाभाविकी)

'पशुवृक्षादिभेदेन जीवा एव स्वतः स्थिताः।
संसृतौ व्यत्ययस्तेषां मुक्तौ तत्तत्स्वरूपता।
तत्र स्थावरमुक्तेभ्यो वरा जङ्गममुक्तकाः।
तेभ्यो मानुषमुक्ताश्च विप्रमुक्तास्ततो वराः।
तत्त्वोपदेशमात्रेण मुक्तेभ्यो वेदवेदिनः।
अर्थज्ञा ऋषयस्तेभ्यो ते देवाः संशयच्छिदः।
पूर्णधर्मास्ततस्त्विन्द्रो निःसङ्गो गरुडस्ततः।
भक्तिपूर्णो हरेर्ब्रह्मा तस्मान्नान्योऽधिकस्ततः।
मुक्तौ वा संसृतौ वाऽपि सम्यगेषु हि ते गुणाः।'

**इति कापिलेये।** (**भा.ता**.3.30.28)

'मुक्ताः प्राप्य परं विष्णुं तद्देहं संश्रिता अपि।

तारतम्येन तिष्ठन्ति गुणैरानन्दपूर्वकैः।

क्षितिपा मनुष्यगन्धर्वा देवाः पितर एव च।

आजानेयाः कर्मदेवास्तत्त्वरूपः पुरन्दरः।

शिवो विरिञ्च इत्येते क्रमाच्छतगुणोत्तराः।

मुक्तावपि तदन्ये ये भूपाः शतगुणोत्तराः।

न समो ब्रह्मणः कश्चिन्मुक्तावपि कथञ्चन।

ततः सहस्रगुणिता श्रीस्ततः परमो हरिः।'

**इति नारायणाष्टोत्तरशतकल्पे।**

## (मुक्तेष्वानन्दतारतम्यं प्रमाणसिद्धम्)

'योगिनां भिन्नलिङ्गानां आविर्भूतस्वरूपिणाम्।

प्राप्तानां परमानन्दं तारतम्यं सदैव हि।

सैषाऽनन्दस्य मीमांसा भवतीत्यादेश्च।' (गी.भा.3.53)

'प्राप्तश्रुतिफलत्वात्तु श्रोत्रियाः प्राप्तमोक्षिणः।

त एव चाऽप्तकामत्वात्तथा कामहता इति।

**इति भारते।** (बृह.भा.अ.3)

'नरादिब्रह्मपर्यन्तं विमुक्तानां शतोच्छ्रयः।

निःशेषदुःखहीनानां नित्यानन्दैकभोगिनाम्।'

**इति हरिवंशे।**(बृह.भा.अ.3-अव्या.ब्रा.)

## (देवेषु तारतम्यं यथाशास्त्रमनुसन्धेयम्)

'अथातः सम्भूतिः परमाद् विद्या विद्यायाः प्राणः प्राणाच्छ्रद्धा श्रद्धायाः शिवः शिवाद् बुद्धिर्बुद्धेरिन्द्रः इन्द्रात्तैजसः प्राणः तैजसादिनिरुद्धो अनिरुद्धात् स्पर्शवातः। स्पर्शवातात् सोमः सोमाद् वरुणो वरुणादग्निः अग्नेर्मित्रो मित्रात् पर्जन्यः पर्जन्यात् स्वाहा स्वाहाया उषा जायते।

तेषां परः परो ज्यायान् गुणैरुत्तर उत्तरः। स्वं स्वभावमापद्यते नैषां पारावर्यमुच्छिद्यते कुतश्चन ।
परावर्येण ब्रह्मोपयन्ति परावर्येण मुक्ताः सञ्चरन्ति। इति श्रुतिः।

'कामः सङ्कल्प आनन्दो मुक्तानां तारतम्यगः।
स्वरूपभूतास्ते सर्वे निर्दोषा गुणरूपकाः।'

**इति पाद्मे।** (तै.भा.व.व.)

'ततः शनिः पृथिव्यात्मा कर्मात्मा पुष्करस्ततः।
क्रमात् प्रत्यवरा ह्येते मुक्ताः सर्वगुणैरपि।
नित्यमुक्तस्तथा विष्णुः प्राणादप्युत्तमोत्तमः।' इति च ।(षड्.भा.6.2)

## (योग्यताभेदेन मुक्तानां भूरादिलोकस्थितिः)

'आत्मेत्येव परं देवम् उपास्य हरिमव्ययम्।
केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन।
अत्रैव च स्थितिस्थेषामन्तरिक्षे तु केचन।
केचित्स्वर्गे महर्लोके जने तपसि चापरे।
केचित्सत्ये महाज्ञानाः गच्छन्ति क्षीरसागरम्।
तत्रापि क्रमयोगेन ज्ञानाधिक्यात्समीपगाः।
सालोक्यं च सरूपत्वं सामीप्यं योगमेव च।
इमामारभ्य सर्वत्र यावत्सु क्षीरसागरे।
पुरुषोऽनन्तशयनः श्रीमान्नारायणाभिधः।
मानुषा वर्णभेदेन तथैवाऽश्रमभेदतः।
क्षितिपा मनुष्यगन्धर्वा देवाश्च पितराश्चिराः।
नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च ।
सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम्।
पूज्यन्ते चापरैस्ते तु सर्वपूज्यश्चतुर्मुखः।

इति गारुडे।(ब्र.सू.भा.4.4.9-19)

‘नृपाद्याः शतधृत्यन्ताः मुक्तिगा उत्तरोत्तरम्।

गुणैः सर्वैः शतगुणा मोदन्त इति हि श्रुतिः।’ इति पाद्मे।

‘चिन्मात्राणीन्द्रियाण्याहुर्भुक्तानामन्यदैव तु।

तान्येव जडयुक्तानि विभिन्नानि स्वरूपतः।’

इति ब्राह्मे। (भा.ता.2.2.23)

## (जीवन्मुक्तस्थितिः)

‘अपक्वा ये न ते यान्ति यान्ति कालान्तरे परे।

आज्ञयैव हरेः केचिदापूर्तेः केचिदञ्जसा।

विहृत्यैवान्यलोकेषु मुच्यन्ते ब्रह्मण सह।’

इति वामने।(भा.ता.2.2.30)

‘वासुदेवाश्रिता देवा ब्रह्माद्या मुक्तबन्धनाः।

भेददृष्ट्याऽभिमानेन चाऽवृत्तिं नैव यान्ति ते।

भुञ्जन्ते तु पृथग्भोगानानन्दं तत्स्वरूपकम्।

स्वरूपं च पृथक् तेषामाविष्टग्रहवद्भवेत्।’

इति ब्रह्माण्डे। (भा.ता.2.2.34)

## (देवोत्तमानामुपदेशः विमुक्तिहेतुः)

‘मुमुक्षवो ब्रह्मणश्च शिवादिन्द्रादिभिस्तथा।

श्रुत्वा ज्ञानं परं गृह्यं मुच्यन्ते ब्रह्मणा सह।’

इति कौर्मे। (भा.ता.4.7.7)

‘अन्ये सर्वाश्रया बद्धा श्रीर्बद्धा विष्णुनैव तु।

बन्धश्च विष्णुतन्त्रत्वं मुक्तानां च श्रियस्तथा।

अमुक्तानां च बद्धत्वं जन्ममृत्यादिदुःखिता।

हेयबन्धश्च सैव स्यान्न तु स्वोच्चवशे स्थितिः। इति गारुडे।

'बाह्यं मनो विलीनं स्यान्मुक्तौ चिन्मात्रकं मनः।

तेनैवानुभवेत्सर्वं स्वात्माभिन्नेन मुक्तिगः।'

**इति मुक्तितत्वे।** (**भा.ता**.11.10.13)

'ब्रह्मान्तः करणाज्जन्यं ज्ञानं नश्यति मुक्तिगे।

स्वरूपज्ञानतो भोगान् मुक्तौ भुङ्क्ते यथेष्टतः' इति मुक्तितत्त्वे।

## (स्वोत्तमवशता मुक्तावप्यस्ति)

'स्वाधिकानां वशत्वं तु परमं सुखमेव तु।

तदन्येषां वशो यस्तु किं सुखं तस्य भण्यताम्।

स्वाधिकानां वशत्वं तु तेषु भक्तिमतः सुखम्।

तदन्येषां तु दुःखाय तस्माद् भक्तोऽधिको भवेत्।'

**इति च।** (**भा.ता**.11.10.17)

## (मुक्तानां सर्वज्ञत्वं न भवति)

'जीवो मुक्तोऽपि नो जीवान् परमात्मानमेव च।

वेत्ति सर्वात्मना विष्णुर्वेत्त्येकः पुरुषोत्तमः।

तस्य प्रसादतः किञ्चिद् ब्रह्माद्या अपि जानते।

अन्यजीवानपेक्ष्यैको जानाति हि चतुर्मुखः।

सामस्त्येन तदन्ये तु लेशज्ञानाः क्रमात् स्मृताः।'

**इति विनिर्णये।**(**भा.ता**.11.11.6,7)

'अज्ञा जीवास्तु कथ्यन्ते मुक्ता अप्यल्पवेदनात्।

वेत्तित्येवोच्यते नित्यं सर्ववेत्तृत्वतो हरिः।'

**इति वैशेष्ये।** (**भा.ता**.11.11.6,7)

गुण्यतिकराभावेऽप्युच्चनीचादि पूर्ववत्।
विष्णोश्चैव तु मुक्तानां न कदाचन गच्छति।

**इति गारुडे**

मुक्ताश्चाधीयते वेदान् जडज्ञानबहिष्कृताः।
स्वरूपभूतज्ञानेन पश्यन्तः सर्वमञ्जसा।

**इति तात्विके।**(**भा.ता**.11.13.7)

मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः।
सा ह्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम्।

## (मुक्तवैभवनिरूपणम्)

‘श्यामवदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः।’

**इति भागवते**(2.9.11)

‘अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उत्वे ददृशे।
कामस्य यत्राप्ताः कामाः तत्र मामृतं कृधि।
श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा।
अतो हि वैष्णवा लोका नित्यास्तच्चेतना अपि।’ इति आग्नेये।

## (साधनानुगुण्येन मुक्तौ फलाधिक्यम्)

‘मुक्तिर्ज्ञात्वापि विष्णुं स्यात् शास्त्रं श्रुत्वा ततोऽधिकम्।
मुक्तौ सुखं तत्पठतः ततोऽप्यधिकमिष्यते।
व्याख्यातुस्तु समं मुक्तौ सुखं नान्यस्य कस्यचित्।

ततोऽधिकं तु देवानां मुख्यव्याख्याकृतो यतः।'

**इति च । (गी.ता**.18.68.73)

'भुञ्जते पुरुषं प्राप्य यथा देवग्रहादयः।

तथा मुक्ता उत्तमायां बाह्यान् भोगांस्तु भुञ्जते।'

**इति नारायणाष्टोत्तरकल्पे । (गी.भा**.3.50)

नानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्माधियां विरोधः।

दोषभावाद् गुरुशिष्यादिभावात् लोकेऽपि नासौ किमु मुक्ताविति श्रुतेः

## (सायुज्यभाजां परमात्मप्रवेशेऽपि स्वीय एव भोगः)

'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते।

अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु।

आविश्य परमात्मानं भुङ्क्ते भोगांस्तु ब्रह्मगान्।

न ह्यानन्दो निजस्तेषां परैर्लभ्य कथञ्चन।

किमु विष्णोः परानन्दो न ते विष्णो।' इति श्रुतेः।

'स्वप्रस्थानां यथा भोगो विना देहेन युज्यते।

एवं मुक्तावपि भवेद् विना देहेन भोजनम्।

स्वेच्छया व शरीराणि तेजोरूपाणि कानिचित्।

स्वीकृत्य जागरितवद् भुक्त्वा त्यागः कदाचन।'

**इति भविष्यत्पुराणे (ब्र.सू.भा**.4.4.8.14)

'स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि।

मुक्तानां नैव कामः स्यादन्यान् कामांस्तु भुञ्जते।

तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते।

न चायोग्यं विमुक्तोऽपि प्राप्नुयान्न च कामयेत्। '

**इति वाराहे। (ब्र.सू.भा**.4.4.9.8)

‘स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्।
बलिं वहन्ति मुक्ताय विरिञ्चाय च पूर्ववत्।’

**इति वाराहे।** (**ब्र.सू.भा**.4.4.9.20)

‘मुच्यते तत्त्वसम्बद्धादाचार्यात्पुरुषो भवात्।
एतावेव स्वतोऽबद्धौ परमः प्रकृतिस्तथा।’

**इति कलापश्रुतिः।** (**भा.ता**.10.94.31)

‘सम्यग्ज्ञानवदाचार्यात् मुच्यते पुरुषो भवात्।
द्वावेव नित्यमुक्तौ तु परमः प्रकृतिस्तथा।’

**इति वामने ।** (**भा.ता**.10.94.31)

‘अमोहाय गुणा विष्णोराकारश्चिच्छरीरता।
निर्दोषत्वं तारतम्यं मुक्तानामपि विद्यते।’

**इति ब्रह्माण्डे।** (**मा.ता.नि**)

‘श्रुण्वे वीर उग्रमुग्रं दमायान्नन्यमन्यमति नेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्।’

‘परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति।
अनानुभूतिरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति।’

‘एतमानन्दमयमात्मानमनुविश्य।
न जायते न म्रियते न ह्रसयते न वर्धते यथाकामं चरति।
यथा कामं पिबति यथाकामं रमते यथाकाममुपरमते।’ इति।

**भोगमात्रसाम्यलिङ्गात्।** (**ब्र.सू.भा**.4.4.10)

## (प्रायः मौक्तानन्दे वृद्धिह्रासौ न भवतः)

‘अवृद्धिह्रासरूपत्वं मुक्तानं प्रायिकं भवेत्।
कादाचित्कविशेषस्तु नैव तेषां निषिध्यते।’

**इति कौर्मे।** (**ब्र.सू.भा**.4.4.10)

‘प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्।

नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित्।

कुत एव तु दुःखं स्यात् सुखमेवं सदोदितम्।

भोगानां तु विशेषे तु वैचित्र्यं लभ्यते क्वचित्।’

**इति नारायणतन्त्रे।** (**ब्र.सू.भा**.4.4.10)

‘अनावृत्तिः शब्दादनावृत्तिः शब्दात्।’

‘न च पुनरावर्तते न च पुनरावर्तते।’

सर्वान् कामानाप्त्वा अमुतः समभवत् समभवत् इत्यादिश्रुतिभ्यः।

एवमाद्यनन्तप्रमाणैः संसारदशायां मुक्तौ च तारतम्यस्य लाभात्

‘नीचोच्चभावं गताः’ इति श्रीपादराजोक्ति सुस्था वेदितव्या॥

## 6. मुक्तिर्नैजसुखानुभूतिः

### (मुक्तौ निर्विशेषचैतन्यमात्रमवतिष्ठत इति वादनिरासः)

ननु ‘मुक्तिर्नैजसुखानुभूतिः’ इत्यत्युक्तं ‘यत्र त्वस्य सर्वमात्मैवाभूत् केन कं पश्येत् यत्र हि द्वैतमिव भवति यत्तद् द्वैतं न पश्यति न तु तद्द्वितीयमस्ति’ ‘ततोऽन्यद्विभक्तं यत्पश्येत्’ इत्यादिश्रुतिस्मृतिपर्यालोचनया मोक्षे ब्रह्मभिन्नस्य स्वस्यैवाभावाद् ब्रह्मभिन्ननैजसुखस्य सुतरामप्रसिद्धेरिति चेत् न।

‘न ह्यानन्दो निजस्तेषां परैर्लभ्यः कथञ्चन।

किमु विष्णोः परानन्दो न ते विष्णोरिति श्रुतेः।’

इति स्मृत्या जीवस्य ब्रह्मानन्दानुभवाभावात्।

‘यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।

तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।’

‘यो वेद निहितं गुहायाम् परमे व्योमन्

सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता।’

**इत्यादिश्रुतिभिः।**

‘ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः।

भुञ्जते स्वसुखान्येव न दुःखादीन् कदाचन।’

इत्यादिस्मृतिभिश्च परममुक्तौ जीवानां ब्रह्मभिन्नस्वानन्दावाप्तेः श्रूयमाणत्वात्। तथा हि—

## (न मुक्तौ ब्रह्मानन्दानुभवः)

आनन्दश्मश्रुरानन्दकेश आपादनखात्सर्व एवानन्दः

स एव विष्णुरजोऽमृतोब्रह्म य एवं वेदानन्द एव

स भवत्यानन्दस्य समार्ष्टितां सलोकतां सायुज्यमेति।

**इति मध्यान्दिनायनश्रुतौ।** (**भा.ता.**10.75.49)

आनन्दभवनस्य मोक्षतोक्त्या जीवस्य ब्रह्मानन्दानुभवस्य बाधितत्वाज्जीवस्वरूपभूतानन्दानुभवः मोक्ष इति सिद्धम्। ‘ब्रह्मैव सन् ब्रह्माप्येति’

‘पूर्णानन्दादि तेऽश्नन्ति पूर्णानन्दादिकाः स्वतः।

ब्रह्मणो ब्रह्मसम्पत्तिम् अत आह श्रुतिः स्फुटम्।

न परब्रह्मतावाप्तिः न ते विष्णाविति श्रुतेः॥’

‘परमब्रह्मता चैषां ब्रह्मलोकात्परा गतिः।

न परब्रह्मरूपत्वमेतमेवेति हि श्रुतेः।’

**इति ब्रह्मतर्के।** (**भा.ता.**10.94.39)

वचनपर्यालोचनया जीवानन्दानुभवस्य मोक्षत्वसिद्धेः।

## (सुखरूपस्यापि जीवस्य असदवस्त्वबिमानाद् दुःखम्)

‘जीवस्य सुखरूपस्य न दुःखं क्वचिदिष्यते।

अतो मनोऽभिमानेन दुःखीभवति नान्यथा।'

इति भारते। (भा.ता.11.23.59)

'अणुमात्रोऽप्ययं जीवः शरीरं व्याप्य तिष्ठति।

यथा व्याप्य शरीराणि हरिचन्दनविप्लुषः।' इति ब्रह्माण्डे।

'चिद्गुणस्य स्वरूपत्वात् तद्व्याप्तिश्चेति युज्यते।

शक्तियोगात्सुराणां तु विविधा च व्यवस्थितिः' इति पाद्मे।

बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्।

स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद् विभोः।' इति मौनश्रुतिः।

## (परमाणुप्रदेशेऽपि सन्त्यनन्तता जीवराशयः)

अनागता अतीताश्च यावन्तः सहिताः क्षणाः।

अतीतानागताश्चैव यावन्तः परमाणवः।

ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक्।'

इति वत्सश्रुतिः। (वि.त.नि.उदाहृता)

'परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणराशयः।

सूक्ष्मत्वादीशशक्त्यैव स्थूला अपि हि संस्थिताः'

इति वत्सश्रुतिः। (वि.त.नि.उदाहृता)

'सहस्रयोजनसभां प्रभावाद्विश्वकर्मणः।

अनन्ता राशयोऽनन्ताः प्रजानामधिसंस्थिताः।'

इति स्कान्दे। (वि.त.नि.उदाहृता)

'स्वतः सर्वेऽपि चिद्रूपाः सर्वदोषविवर्जिताः।

जीवास्तेषां तु ये दोषास्त उपाधिकृता मताः।

समाधियोगे सम्पूर्णे हृदि पश्यन्ति केशवम्।

जीवंस्तत्प्रतिबिम्बं च तेनैव सह संस्थितः।

तदाधारं तदन्तःस्थं तेनैव सदृशं सदा।

आनन्दज्ञानशक्त्याद्यैः सदा तदवरं गुणैः।

जीवन्मुक्तौ च मुक्तौ च सततं तद्वशे स्थितम्।' इति ध्यानयोगे।

## (मुक्ता अपि स्वेच्छया हरिमुपासते)

'स्थितप्रज्ञत्वमाप्ता ये ज्ञानेन परमात्मनः।

ब्रह्मलोकं गताः सर्वे ब्रह्मणा च परं गताः।

तीर्णतर्तव्यभागाश्च स्वेच्छयोपासते परम्।'

**इति वायुप्रोक्ते।** (**ब्र.सू.भा.**3.3.17.28)

'कदाचित्कर्म कुर्वन्ति कदाचिन्नै कुर्वते।

नित्यज्ञानस्वरूपत्वात् नित्यं ध्यायन्ति केशवम्।

तीर्णतर्तव्यभागा ये प्राप्तानन्दाः परात्मनः।

प्रत्यवायस्य बन्धस्याभावात् स्वेच्छया भवेत्।'

**इति ब्रह्माण्डे।** (**ब्र.सू.अ.**3.3.18.30)

'निर्दुःखं तु सुखं नित्यं मोक्ष इत्युच्यते बुधैः।

चिदानन्दशिरोदेहपाणिपादात्मकाः सदा।

सर्वदोषविनिर्मुक्ताः मुक्ताः क्रीडन्ति नित्यशः।' इति श्रुतिः।

'चिदानन्दशरीरेण सर्वे मुक्ता यथा हरिः।

भुञ्जते कामतो भोगान् तदन्तर्बहिरेव च ।'

**इति परमश्रुतिः।** (**गी.ता.**2.18)

'विकारेच्छादिनिर्मुक्तश्चिन्मात्रेच्छादिसंयुतः।

मुक्त इत्युच्यते जीवो मुक्तिश्च द्विविधा मता।'

**इति नारायणश्रुतिः।**(**गी.ता.**13.3)

एवमाद्यनन्तप्रमाणैर्जीवस्वरूपानन्दाविर्भावस्य मोक्षत्वश्रवणात् 'मुक्तिर्नैजसुखानुभूतिः' इति श्रीपादराजोक्तिर्युक्तिमती।

## 7.अमला भक्तिश्च तत्साधनम्

### (ज्ञानान्मुक्तिरिति प्रमाणवचसां ज्ञानजन्यभक्त्या मुक्तिरित्यर्थः)

'नन्वमला भक्तिश्च तत्साधनम्' इति यदुक्तं तदयुक्तम्। तच्छब्दस्य मोक्षार्थकत्वेन तस्य ज्ञानैकसाध्यत्वस्य 'ब्रह्मविदाप्नोति परं' 'दृष्ट्वैव तं मुच्यते' 'तमेव विद्वानमृत इह भवति' 'तमेवं विदित्वा अति मृत्युमेति' 'ज्ञानादेव तु कैवल्यम्' 'कर्मणा ज्ञानमातनोति ज्ञानेनामृती भवति' 'स सर्वविद् भजति मां सर्वभावेन भारत' 'ब्रह्म वेद ब्रह्मैव भवति' 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनं परमं साम्यमुपैति' 'यो वेद निहितं गुहायाम्' इत्यादिश्रुतिस्मृतिभ्यः सिद्धत्वादिति चेत् न । ज्ञानस्य भक्तिद्वारकत्वात्। तथा हि -

'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा॥' (म.भा.ता.नि.)

'

'स एष देवः परोऽजरोऽमरस्तं वा एनमाहुर्भक्त इति' भक्त्या सोऽनुगृह्णाति।

### (भक्तेराधिक्यान्मुक्तावानन्दाधिक्यम्)

अथातो भक्तिमीमांसा भवति 'युवा स्यात् साधु युवाध्यायकः आशिष्ठो दृढिष्ठो बलिष्ठः यस्येयं पृथिवी सर्वा वित्तेन पूर्णा स्यात् एको मानुषभक्तो भवति' ते ये शतं मानुषा भक्ताः एतावान्मानुषो गन्धर्वस्ते ये शतं मानुषगन्धर्वाः एतावान् देवगन्धर्वः ते ये शतं देवगन्धर्वा एतावांश्चिरलोकलोकः पैतृकः ते ये शतं चिरलोकलोकाः पैतृकाः एतावांश्चिरलोको दैवतः ते ये शतं चिरलोका देवकाः एतावत्यताात्विकी देवता याः शतमताात्विक्यो देवताः एतावान् पुरुहूतस्ते ये शतं पुरुहूताः एतावानेव रुद्रस्ते ये शतं रुद्राः एतावानेव विरिञ्चस्ते ये शतं विरिञ्चाः एतावती श्रीर्भक्त्या भवति

तद्यावती भक्तिस्तावदेव तद्ज्ञानं भवति यावद् यावद् ज्ञानं तावदानन्दो मौक्तिकोऽथैष परम आनन्दो योऽसौ हरिः एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति।

**इति पौत्रायणश्रुतिः।** ( **भा.ता**.10.75.50)

'मिलितौ वा एतौ तदनुग्रहश्च भक्तिश्च' इत्यारभ्य यावान्वै ब्रह्मणोऽनुग्रहः प्रकृतौ तदवरो वा महति तदवरश्च रुद्रे तदवरः पुरुहूत अथ तेवेष्वपि पितृमनुष्येषु। इति धर्मश्रुतिः।

## (भक्तिर्निरवधिका निर्दुष्टा च मुक्तिप्रदा)

'यादृशी च हरौ भक्तिः तादृश्यन्यत्र नैव चेत्।
अनन्यभक्तिरुद्दिष्टा तया मुक्तिर्न चान्यथा॥
अतः कान्ततया वापि मुक्तिर्भक्तिमतां हरौ।
स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरःस्त्रियः।
काश्चित्काश्चिन्न कामेन भक्त्या केवलयैव तु।
मोक्षमायान्ति नान्येन भक्तियोगं विना क्वचित्।'

**इति पाद्मे।** (**भा.ता**.10.27.15)

'नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।' इति गीतायाम्।

'भक्त्या प्रसन्नः परमो दद्याद् ज्ञानमनाकुलम्।
भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत्।
ततोऽपि भूयसीं भक्तिं दद्यात् ताभ्यां विमोचयेत्।
निर्दोषत्वं च विज्ञाय विष्णोस्तत्राखिलाधिकः।
स्नेहो भक्तिरिति प्रोक्तः सर्वोपायोत्तमोत्तमः।
तेनैव मोक्षो नान्येन ईक्षादिस्तस्य साधनम्।
यादृशी मयि भक्तिः स्यात् तादृश्यन्यत्र नैव चेत्।

अनन्यभक्तिः सा ज्ञेया विष्णावेव तु सा भवेत्।

नान्यभक्तोऽपि यो द्वेष्यो न चाभक्तोऽपि यः प्रियः।

किन्तु भक्त्यानुसारेण फलदोऽतः समो हरिः।' इति पाद्मे।

'विष्णुभक्तिविधानार्थं सर्वशास्त्रं प्रवर्तते।' इति पैङ्गीश्रुतिः (गी.ता.17.28)

'द्वादश्यादिव्रतं चैव तुलस्याद्यैरथार्चनम्।

सर्वं भक्त्यार्थमुद्दिष्टं निष्फलं तत्तु तां विना।' इति हरिवंशे।

'महत्वबुद्धिर्भक्तिस्तु स्नेहपूर्वभिधीयते।

तथैव व्यज्यते सम्यग् जीवरूपं सुखादिकम्।'

**इति पाद्मे** (**ब्र.सू.भा**.3.2.11)

**'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी'**

**इति माठरश्रुतिः।**

'भक्तिस्तु परमा विष्णौ तयैवैनं वशं नयेत्।

तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया।

स्नेहानुबन्धो यस्तस्मिन् बहुमानपुरः सरः।

भक्तिरित्युच्यते सर्वैः कारणं परमेशितुः।' इति।

'ज्ञानभक्ती विना नैव मुक्तिः कस्यापि विद्यते।

भक्त्या ज्ञानान्निषिद्धानां त्यागान्नित्यं हरिस्मृतेः॥

अरागाद्विहितात्यागादित्येतैरेव संयुतैः।

अपरोक्षदर्शनं विष्णोर्जायते नान्यथा क्वचित्॥'

**इति सत्तत्वे । (गी.ता**.8.8)

'ज्ञात्वा ध्यानं ज्ञानमात्राद् ध्यानादपि तु दर्शनम्।

दर्शनाच्चैव भक्तेश्च न किञ्चित्साधनाधिकम्।' इति नारदीये। (गी.भा.6.47)

विज्ञानान्न कुतो भक्तिः कुतो भक्तिं विना हि तत्। इति च ।

‘सर्वाऽधिकं ध्यानमुदारहन्ति ध्यानाधिके ज्ञानभक्ती परात्मन्।
मुच्यते नात्र सन्देहो दृष्ट्वा तु समयोग्यया।
दर्शनेनाऽत्मयोगेन मुक्तिर्नान्येन केनचित्।’ इत्याध्यात्मे।

‘एकमेवाद्वितीयं ते विष्णुभक्तिर्हि साधने।
एक एवाद्वितीयोऽसौ प्रणवो मन्त्र उच्यते।’ इति हरिवंशे।

‘भक्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित्।
कामभक्त्याऽप्सरः स्त्रीणाम् अन्येषां नैव कामतः।’

**इति बद्रकायाम्।** (**भा.ता**.10.37.15)

‘ये भक्त्या विवशा विष्णोः नाममात्रैकजल्पकाः।
अपि मुक्तिं व्रजन्त्याशु किमुत ध्यायिनः सदा।’

**इति व्योमसंहितायाम्।** (**भा.ता**.3.10.15)

‘सर्वथा भक्तितो मुक्तिर्द्वेषात्तम उदीरितम्।
नियमस्त्वनयोर्नित्यं मोहायान्यद्वचो भवेत्।’

**इति ब्रह्मवैवर्ते।** (**भा.ता**.3.2.24)

‘दोषोज्झिता च या भक्तिः सा मोक्षं नियमान्नयेत्।
भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवला।
मुक्तानामपि भक्तिर्हि नित्यानन्दस्वरूपिणी।
दानतीर्थतपोयज्ञपूर्वाः सर्वेऽपि सर्वदा।
अङ्गानि हरिसेवायां भक्तितस्त्वेका विमुक्तये।’ (म.ता.नि.)

‘तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।’ इति च।

‘ज्ञानी प्रियतमोऽतो मे’

‘ज्ञानाग्निः सर्वकर्माणि भस्मसाद्कुरुतेऽर्जुन।

तपस्तीर्थं जपो होमः पवित्राणीतराणि च।

नालङ्कुर्वन्ति तां शुद्धिं या ज्ञानकलया कृता।’ इति भागवते।

‘सर्वं ज्ञानप्लवेनैव व्रजिनं सन्तरिष्यसि।’ इति गीतायाम्।

अमुक्तो मुक्तसादृश्यान्मुक्त एव हि तत्वदृक्।

किमु मुक्तिङ्गतस्तस्माद् ज्ञानमेवाधिकं नर।’

**इति नारदीये।** (**गी.ता**.5.3.8)

ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव कामाः सम्पद्यन्ते।

अथापि यथा यथा कर्म कुरुते तथा तथाऽधिको भवति।

**इति कौण्ठारव्यश्रुतिः।** (**ब्र.सू.भा**.3.4.1.8)

‘विद्वानमृतमाप्नोति नात्र कार्या विचारणा।’ इति हरिवंशे।

‘तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते।

एवं एवंविदि पापं कर्म न श्लिष्यते।

तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं

हैवास्य सर्वे पाप्मानः प्रदूयन्ते।

ध्यानं त्वखिलधर्मेभ्यो ध्यानाच्च ज्ञानमुत्तमम्।

न ज्ञानसदृशः कश्चित्पुरुषार्थप्रसिद्धये।’ इति प्रवृत्ते। (कर्मनिर्णये)

‘अशेषकर्मपूगोऽपि न विष्णुध्यानलेशभाक्।

तच्च ध्यानं हरेर्ज्ञानं कोट्यंशाय प्रपूर्यते।’

**इति कर्मविवेके।(कर्मनिर्णये)**

## (श्रीसहित एव विष्णुरुपास्यः)

'श्री सुतुष्टा हरेस्तोषं गमयेत् क्षिप्रमेव तु।

अतुष्टा तदतुष्टिं च तस्मात् ध्येयैव सा सदा॥'

**इति ब्रह्माण्डवचनम्** (**गी.ता**.12.1)

'अविष्णुज्ञैरतद्भक्तैस्तदुपासाविवर्जितैः।

शपेदुपासिताऽप्येषा श्रीस्तान् तद्धरितत्ववित्।

तद्भक्तस्तमुपास्यैव श्रियं ध्यायीत नित्यदा।

तेन तुष्टा तु साऽच्छिद्रं दद्याद् विष्णोरुपासनम्।

ततस्तद्दर्शनान्मुक्तिं यात्यसौ नात्र संशयः।

तथाऽपि सर्वपरमां सर्वदोषविवर्जिताम्।

ज्ञात्वा श्रियं तत्परमं तत्पतिं पुरुषोत्तमम्।

विज्ञायोपासते नित्यं ते हि युक्ततमा मताः।

यतः क्लेशोऽदिकस्तेषां पृथक् श्रियमुपासताम्।

विष्णुना सहिता ध्याता साऽपि तुष्टिं परां व्रजेत्।'

**इति परमश्रुतिः।** (**गी.ता**.12.1)

## (असदुपासना न कार्या)

'उपासनायाः कार्यत्वे विष्णोरात्मत्व ए वा।

उभयत्रापि तात्पर्यमात्मोपासादिके विधौ।

तस्मादसत्यं न ध्यायेत्तत्सत्यवतां  तथा।

विचार्य बहुभिर्वाक्यैर्मतिमान् स्वार्थचोदकैः।'

**इति हरिवंशेषु।** (**बृह**.**भा**.**अ**.3.**अव्या**.**ब्रा**.)

## (अधिकारिभेदेन उपासनाभेदः)

'केषाञ्चित्सर्वगत्वेन केषाञ्चिद्धृदये हरिः।

केषाञ्तिद्बहिरेवासौ उपास्यः पुरुषोत्तमः।

अग्नौ क्रियवतां विष्णुर्योगिनां हृदये हरिः।
प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनाम्।
सर्वैश्च वेदैः परमो हि देवो जिज्ञास्योऽसौ नाल्पवेदैः प्रसिद्ध्येत्।
तस्मादेनं सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेन्मुमुक्षुः।'

**इति चतुर्वेदशिखायाम्।** (ब्र.सू.भा.2.2.1)

## (पूर्णत्वविरोधिगुणाः नोपास्याः)

गुणैरेव स तूपास्यो नैव दोषैः कथञ्चन।
गुणैरपि न तूपास्यो ये पूर्णत्वविरोधिनः।

**इति ब्रह्मतन्त्रे।** (ब्र.सू.भा.3.)

'गुणानां स्मरणाशक्तौ विष्णोर्ब्रह्मत्वमेव हि।
स्मर्तव्यः सततं तत्तु न कदाचित्परित्यजेत्।
अत्र सर्वगुणानां च यतोऽन्तर्भाव इष्यते।
स्वोत्पत्त्यङ्गं हि देवानां विष्णोश्चिन्त्यं विशेषतः।'

**इति नारायणतन्त्रे।** (ब्र.सू.भा.4.1.5)

'उदकैश्च नमस्कारैः स्तुतिभिर्मनसा तथा।
यतिभिश्चापि सम्पूज्यो देवो मोक्षमियासुभिः।
मध्ये विष्णुमनुस्मृत्य नान्यथा तु कथञ्चन।' इति समाचारे।

एवमाद्यनन्तमानैर्माहात्म्यज्ञानपूर्वात्यन्तसुदृढसर्वाधिकस्नेहशब्दितभक्तेर्मुक्तिसाधनत्वस्य सिद्धत्वात् 'भक्तिश्च तत्साधनम्' इति व्यासतीर्थविद्यागुरुभिर्लक्ष्मीनारायणतीर्थश्रीपादैरुक्तमत्युत्तमं वेदितव्यम्।

# 8.अक्षादित्रितयं प्रमाणम्

## (प्रमाणविभागे वादिविप्रतिपत्तिनिरासः)

**ननु 'अक्षादि त्रितयं प्रमाणम्' इति कथम्।**

'प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानं च तच्चाथ साङ्ख्याः शब्दं च ते अपि।
न्यायैकदेशिनोऽप्येवम् उपमानं च केचन।
अर्थापत्त्या सहैतानि चत्वार्याहुः प्रभाकराः।
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः।'

**इति वादिभिः प्रमाणानां बहूनामङ्गीकृतत्वाद् इति चेत् न । प्रमाणत्वेन प्रमितानां यथासम्भवं त्रितयान्तर्भूतत्वात्।**

## (अनुमा कामचारिणी)

'अनुमाया विरोधश्चेत्प्रत्यक्षेणाऽगमेन वा।
सैवाप्रमाणतां गच्छेदागमद्विट् तथाऽक्षजम्।' इति वायुप्रोक्ते।

'निर्णयस्त्वागमेनैव नानुमाऽगमवर्जिता।
क्वचिन्निर्णीतहेतुः स्यादतः शास्त्राद्विनिर्णयः।' इति भारते । (बृह.भा.अ.3)

'श्रुतिसाहाय्यारहितमनुमानं न कुत्रचित्।
निश्चयत्साधयेदर्थं प्रमाणान्तरमेव च।
श्रुतिस्मृतिसहाय्यं यत्प्रमाणान्तरमुत्तमम्।
प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा।
पूर्वोत्तरविरोधे तु कोऽत्रार्थोऽभिमतो भवेत्।
इत्याद्यमूहनं तर्कः शुष्कतर्कं तु वर्जयेत्।
सर्वत्र शक्यते कर्तुमागमं हि विनाऽनुमा।
तस्मान्न सा शक्तिमती विनाऽऽगममुदीक्षितुम्।'

**इति वाराहे।** (**ब्र.सू.भा.**1.1.3)

‘न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्वेदा ह्येवैनं वेदयन्ति।’

**इति भाल्लवेयश्रुतिः।**

## (ऋगादयश्चत्वारः मूलरामायणं भारतं पञ्चरात्रं चेति प्रमाणानि)

‘ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा।
भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः।
पुराणानि च यानीह वैष्णवानि विदो विदुः।
स्वतः प्रामाण्यमेतेषां नात्र कार्या विचारणा।
यद्येषूक्तं न दृश्येत पूर्वकर्मात्र कारणम्।
नाप्रामाण्यं भवेत्तेषां दृश्यते ह्यधिकारतः।
इतः प्रामाण्यमन्येषां न स्वतस्तु कथञ्चन।
अदृश्योक्तौ ततस्तेषाम् अप्रामाण्यं कथञ्चन।’

**इति भविष्यत्पुराणे।** (ब्र.सू.भा.2.1.2)

## (वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना)

‘वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना।
अन्येषां तु विरुद्धानां विप्रलम्भोऽथवा भ्रमः।’

**इति भागवततन्त्रे।**(ब्र.सू.भा.2.1.6)

‘बहुवाचिनां तु शब्दानां लिङ्गप्रकरणादिभिः।
प्रवृत्तिहेतोश्चाऽधिक्यान्निर्णयोऽर्थेषु गम्यते।’

**इति शब्दनिर्णये।**(गी.ता.3.42)

‘न युक्तियोगाद्वाक्यानि निराकार्याण्यपि क्वचित्।
विरोध एव वाक्यानां युक्तयो न तु युक्तयः।’

**इति बृहत्संहितायाम्।** (ब्र.सू.भा.2.1.7)

‘यद्वाक्योक्तं न तद्युक्तिर्विरोद्धुं शक्नुयात्क्वचित्।

विरोधे वाक्ययोः क्वापि किञ्चित्साहाय्यकारणम्।’

**इति पुरुषोत्तमतन्त्रे।** (**ब्र.सू.भा.**2.1.8)

## (इतिहासपुराणाभ्यां वेदार्थः स्फुटो भवति)

‘यदि विद्याच्चतरुर्वेदान् साङ्गोपनिषदान् द्विजः।
न चेत्पुराणां संविद्यान्नैव स स्याद् विचक्षणः।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रचलिष्यति।
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।
अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन।
अतो वेदत्वमेतेषां यतस्ते सर्ववेदकाः।’

**इति स्कान्दे।** (**ब्र.सू.भा.**2.1.6)

‘वेदाश्चैवेतिहासाश्च पुराणं भारतं तथा।
मूलप्रमाणमुद्दिष्टं मीमांसा च तथोत्तरा।
एतेषामविरोधे तु मानमन्यमुदाहृतम्।
एतेषां तु विरुद्धं यद् अप्रमाणं विदो विदुः।’

**इति व्याससमृतौ।** (**बृह.भा.अ.**3)

‘विष्णोः सर्वोत्तमत्वस्य ज्ञानार्थं शास्त्रमिष्यते।
अतस्तत्साधकं शास्त्रं दुःशास्त्रं तद्विरोधि यत्।’

**इति ब्रह्माण्डे।** (**बृह.भा.अ.**3.**अव्या.ब्रा.**)

‘विष्णोः सर्वोत्तमत्वं च तद्भक्त्या मोक्ष एव च।
शास्त्रार्थ इति निर्दिष्टः सर्वशास्त्रविनिर्णयात्।’

**इति पाद्मे।** (**बृह.भा.अ.**3.**अव्या.ब्रा.**)

‘येनोक्तमार्गमानत्वं कुतस्तदिति तं वदेत्।

प्रत्यक्षादेर्यदि ब्रूयात्तन्मात्त्वं क्वेति तं वदेत्।

तत्स्वतश्चेदागमस्य प्रामाण्यं न स्वतः कुतः।

परतश्चेत्प्रमाणस्य न कस्यापि स्थितिर्भवेत्।'

**इत्यादि भविष्यत्पर्वणि। (बृह.भा.अ.३.अव्या.ब्रा.)**

'ऋगादयश्च चत्वारः पञ्चरात्रं च भारतम्।

मूलरामायणं ब्रह्मसूत्रं मानं स्वतः स्मृतम्।

अविरुद्धं तु यत्त्वस्य प्रमाणं तच्च नान्यथा।

एतद्विरुद्धं यत्तु स्यान्न तन्मानं कथञ्चन।

वैष्णवानि पुराणानि पञ्चरात्रात्मकत्वतः।

प्रमाणान्येव मन्वाद्याः स्मृतयोऽप्यनुकूलतः।

एतेषु विष्णोराधिक्यमुच्यतेऽन्यस्य न क्वचित्।' इति भारततात्पर्ये।

'यथार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोः।

ज्ञानं च द्विविधं बाह्यं तथानुभवरूपकम्।

बल्येवानुभवस्तत्र निर्दोषं त्वक्षजादिकम्।

अनुप्रमाणतां याति तथाक्षादित्रयं ततः॥' इति ब्रह्मतर्के

एवमादिश्रुतिस्मृतिभिः प्रत्यक्षानुमागमानां प्रमाणत्वसिद्धेः 'अक्षादित्रितयं प्रमाणम्' इति यदुक्तं तत्सुष्टु॥

## 9.अखिलाम्नायैकवेद्यो हरिः

### (ब्रह्मशब्दावाच्यं न )

ननु 'अखिलाम्नायैकवेद्यो हरिः' इति यदुक्तं तच्चिन्त्यम्। 'यतो वाचो निवर्तन्ते तत्प्राप्य मनसा सह' 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' 'अवचनेनैव प्रोवाच'

'यद्वाचाऽनभ्युदितम् येन वागभ्युद्यते' 'यच्छ्रोत्रेण न श्रृणोति येन श्रोत्रमिदं श्रुतम्' इत्यादिना अशाब्दत्वश्रवणादिति चेन्न।

## (स्वातन्त्र्यात् सर्वकर्तृत्वात् सर्वान्तर्यामितया विष्णोः सर्वशब्दाभिधेयता)

'सर्वशब्दाभिधेयत्वं सर्वान्तर्यामकत्वतः।
न तु सर्वस्वरूपत्वात् सर्वभिन्नो यतो हरिः।'

**इति मात्स्ये।** (भा.ता.4.8.45)

'अपौरुषेयवेदेषु विष्णुदेवेषु चैव हि।
सर्वत्र ये गुणाः प्रोक्ताः सम्प्रदायागताश्च ये।'

**इति गारुडे ।** (गी.भा.3.42)

'वर्णेशानि पदान्याहुः पादाश्चापि तदीश्वराः।
पादानामीश्वरोऽर्धर्चं तदीशा ऋच एव हि॥
ऋचामधीशा वर्गाश्च तेषां सूक्तमधीश्वरम्।
सूक्ताधीशास्तथाध्यायास्तेषामीशास्तथाष्टकाः।
तदधीशास्तथा शाखाः वेदाश्चापि तदीश्वराः।
वेदानामीश्वरा वाच्या वाच्यानामीश्वरो हरिः।
न हरेरीश्वरः कश्चित् कदापि क्वापि विद्यते।' इति प्राधान्ये। (भा.ता.11)

'तत्तत्पदार्थभिन्नोऽपि तत्तन्नाम्नैव सोऽच्युतः।
स्वातन्त्र्यात्सर्वकर्तृत्वाद्गुणानान्त्याच्च केवलम्।' इति च।

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत् ते पदं सङ्ग्रहेण प्रवक्ष्ये॥
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।
अप्रसिद्धेरवाच्यं तद् वाच्यंसर्वागमोक्तितः।
अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम्॥'

**इति गारुडे।** (**ब्र.सू.भा**.1.1.5)

‘दुर्दुःखमिति विज्ञेयं स्वं सुखं च तयोर्यतः।

प्रदाता परमो विष्णुः तस्माद्दुःखादिनामवान्।’ इति हरिवंशे।

‘विध्यादीनां नियन्ता यः पूज्यः प्राप्यश्च तद्वता।

इत्यादिश्रुतिरूपेण विध्यादिश्रुतयोऽपि तु।

हरिं वदन्ति सर्वेषां तन्नामत्वादथापि वा।’

**इति श्रुतिनिर्णये।** (**भा.ता.**)

‘ब्रह्मेशेन्द्रादिसन्नाम्नां येऽर्थभूता गुणा मताः।

पूर्तिदातृत्वद्रष्टृत्वप्रमुखास्ते हरेः सदा।

अतस्तु सर्वनामासौ सर्वकर्ता च केशवः॥’ इति पाद्मे। (भा.ता.10.94.32)

‘स्वातन्त्र्यादवरत्वं च परस्यापि प्रयुज्यते।

स्थितस्यापि यथा राज्ञस्स्वानां जयपराजयौ॥’

**इति च।** (**भा.ता**.3.21.52)

‘सत्वादिनाम विष्णोर्हि सत्वादिस्थस्य केवलम्।

जीवस्थस्यैव तन्नाम जीवादेरुपचारतः॥’ इति हरिवंशे।

‘वेदे रामायणे चैव पुराणे भारते तथा।

आदावन्ते च मद्ये च विष्णुः सर्वत्र गीयते॥’

**इति हरिवंशे।** (**ब्र.सू.भा**.1.1.1)

‘नारायणपरा वेदा देवा नारायणाङ्गजाः।’ इति च । (भाग.)

‘स्त्रीरूपश्चैव पुंरूपो यस्मान्नारायणः स्थितः।

पुमांस्त्री वेति वाच्योऽसौ वैलक्षण्यान्न चोच्यते।

विष्णोर्नपुंसकाकारो नैवास्ति वचनं प्रभोः।

तथाऽप्यरागाकृष्टत्वातच्छब्दैरपि कथ्यते॥’

इति गारुडे।(महै.भा.2.2.)

‘आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम्।

न वर्तन्ते तदन्यत्र श्रुङ्गिबेराग्निशब्दवत्॥’ इति पाद्मे। (महै.भा.2.3)

‘नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति।’

इति भाल्लवेयश्रुतिः।

## (सर्वशब्दमुख्यवाच्यो विष्णुरेव)

‘यो वेदानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या।

ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते।

असम्पूर्णाः परे यस्मादुपचारेण वा भवेत्।

ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।

वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः।

वासुदेवात्परः कोऽनु ब्रह्मशब्दोदितो भवेत्।

स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः।

एतस्माद् ब्रह्मशब्दोऽयं विष्णोरेव विशेषणम्।

अमिता हि गुणा यस्मानान्येषां तमृते विभुम्।

वेदेषु च पुराणेषु गीयते पुरुषोत्तमः।’ इति ब्राह्मे।

## (ऋते नारायणादीनि स्वीयनामानि विष्णुरन्येषां प्रादात्)

‘न तु नारायणादीनां नाम्नामन्यत्र सम्भवः।

अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः।’ इति वामने।(ब्र.सू.भा.1.3.1)

‘ऋते नारायणादीनि नामानि पुरुषोत्तमः।

प्रादादन्यत्र भगवान् राजेवर्तें स्वकं पुरम्।’

इति स्कान्दे।(ब्र.सू.भा.1.3.1)

‘चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति।
उग्रो भस्मधरो नग्नः कपालीति शिवस्य च।
विशेषनामानि ददौ स्वकीयान्यपि केशवः।’

**इति ब्राह्मे।** (**ब्र.सू.भा**.1.3.1)

‘तस्मिन् काले महाराजा राम एवाभिधीयते।
यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते।’

**इति स्कान्दे।** (**ब्र.सू.भा**.1.1.11)

सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः।
सर्वनामाभिधेयश्च सर्ववेदेडितश्च सः॥’ इति च।

‘चक्रं चङ्क्रमणादीशो वर्जनाद्वज्रमुच्यते।
खण्डनात्स्वङ्ग एवैषो हेतिनामा स्वयं हरिः॥’

**इति ब्रह्मतर्के।** (**ब्र.सू.भा**.1.3.10)

‘यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयते।
यथा जीवः परात्मेति यथा राजा जयीत्यपि।’

**इति स्कान्दे।** (**ब्र.सू.भा**.1.4.1)

‘ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः।
प्राण एव प्राण ऋच इत्येव विद्यात्।’ इति ऐतरेयोपनिषदि।

‘परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि।
व्यवह्रियन्ते सततं लोकवेदानुसारतः॥’ इति ब्राह्मे। (ब्र.सू.भा.1.4.5)

## (स्त्रीवाचकशब्दा अपि विष्णौ प्रयुज्यन्ते)

‘अविकारोऽपि परमः प्रकृतिं तु विकारिणीम्।
अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते॥’

इति नारदीये। (ब्र.सू.भा.1.4.6)

‘व्यवधानेन सूतिस्तु पुंस्त्वं विद्वद्भिरुच्यते।

सूतिरव्यवधानेन स्त्रीत्वमाहुर्मनीषिणः।

उभयात्मकसूतित्वाद्वासुदेवः परः पुमान्।

प्रकृतिः पुरुषश्चेति शब्दैरेकोऽभिधीयते।’

इति ब्रह्माण्डे। (ब्र.सू.भा.1.4.6)

एष ह्येव शून्य एष ह्येव तुच्छो एष ह्येवाभावो एष ह्येवाव्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्च।

इति महोपनिषदि। (ब्र.सू.भा.1.4.7)

## (अन्यत्र प्रसिद्धैः अन्यत्रैव प्रसिद्धशब्दैश्च विष्णुरेव वाच्यः)

‘शमूनं कुरुते यस्माददृश्यः सन् परः स्वयम्।

तस्माच्छून्यमिति प्रोक्तस्तोदनात्तुच्छ उच्यते।

नैव भावयितुं योग्यः केनचित्पुरुषोत्तमः।

अतोऽभावं वदन्त्येनं नाश्यत्वान्नाश्य इत्यपि।

सर्वस्य तदधीनत्वात्तत्तच्छब्दाभिधेयता।

अन्येषां व्यवहारार्थमिष्यते व्यवहर्तृभिः।’

इति महाकौर्मे। (ब्र.सू.भा.1.4.7)

‘एकशब्दैर्द्विशब्दैश्च बहुशब्दैश्च केशवः।

एक एवोच्यते देवः तावता नास्य भिन्नता।’

इति भविष्यत्पुराणे। (ब्र.सू.भा.2.3.12)

‘आत्मा मेयः परंब्रह्म परानन्दादिकाभिदाः।

वदन्ति विष्णुमेवैकं नान्यत्राऽसां गतिः क्वचित्।’

इति कौर्मे। इति महोपनिषदि। (ब्र.सू.भा.2.3.12)

‘यथा नदीनां सलिलं शक्ये सागरगं भवेत्।

एवं वाक्यानि सर्वाणि पुंशक्त्या ब्रह्मवित्तये।

मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते।
मूर्तामूर्तेतरद् ब्रह्मा न सत्तन्नासदुच्यते॥

इति पैङ्गीश्रुतिः। (तत्वाद्योते)

'सर्वज्ञं सर्वकर्तारं नारायणमनामयम्।
सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि।
सर्वेषामपि वेदानाम् इतिहासपुराणयोः।
प्रमाणानां च सर्वेषां तदर्थं चान्यतुच्यते॥'

इति नारदीये। (वि.त.नि)

'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम्।
अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरुषार्थस्ततोऽतः॥'

इति पैङ्गीश्रुतिः। (वि.त.नि)

'मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम्।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम्।' इति महावाराहे

'आततत्वाच्च मातृत्वादात्मेति परमो हरिः।
आत्मभासास्तदन्ये तु न ह्येषामातता गुणाः।' इति महोपनिषदि।

'अहंनामा हरिर्नित्यम् अहेयत्वात्प्रकीर्तितः।
त्वं चासौ प्रतियोगित्वात्परोक्षत्वास इत्यपि।
सर्वान्तर्यामिणि हरावस्मच्छब्दविभक्तयः।
युष्मच्छब्दगताश्चैव सर्वास्तच्छब्दगा अपि।
सर्वशब्दगतान्येव वचनान्यखिलान्यपि।
स्वतन्त्रत्वात्प्रवर्ततन्ते व्यावृत्तेऽप्यखिलात्सदा।
तत्सम्बन्धात्तु जीवेषु तत्सम्बन्धादिचित्स्वपि।
वर्तन्त उपचारेण तिङ्गदान्यखिलान्यपि।
तस्मात्सर्वगतो विष्णुरेको द्विः त्रिस्तथा बहुः।

**इति नारायणश्रुतिः। (वि.त.नि)**

‘सर्वोत्तमं सर्वदोषव्यपेतं गुणैरशेषैः पूर्णमन्यं समस्तात्।
वैलक्षण्याद् ज्ञापयितुं प्रवृत्ताः सर्वे वेदा मुख्यतो नैव चान्यत्।’

**इति महोपनिषदि। (वि.त.नि)**

‘हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति।
यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमेवाभिविशन्ति।
एवमेव नामानि सर्वाणि पुरुषमेवाभिविशन्ति।
प्राणं धारयते यस्मात्स जीवः परमेश्वरः।
अजीवोऽपि महातेजास्त्वथवा जीवयुज्जगत्।’

**इति स्कान्दे। (भा.ता.2.5.34)**

‘रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः।
रमणाभयवर्णाद्याः शब्दवृत्तेर्हि हेतवः।
हरिर्हि तत्रतत्रस्थो रमणादीन् करोत्यजः।
अतस्तस्यैव नामानि व्याजादन्यगतानि तु।
व्यवहारप्रवृत्त्यर्थं दृष्टानां मोहनाय च।’ इति स्कान्दे। (भा.ता.2.7.35)

‘मर्त्यस्य चोत्तमानन्दज्ञानदातृत्वतः सदा।
सत्यस्य सत्यो भगवान् सत्यस्थो जगतिः स्थितः।
जगन्नेतृत्वतः सत्यनेता विष्णुः प्रकीर्तितः।
अत्तृत्वाज्जगदादीनां सत्यात्मा चोच्यते विभुः।’

**इति तन्त्रभागवते।(भा.ता.10)**

ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः।
अद्वितीयो महाविष्णुः पूर्णत्वात्पुरुषः स्मृतः।’ इति

विश्वनामा स भगवान् यतः पूर्णगुणः प्रभुः। इति पाद्मे।

आनन्दत्वाद् अनामासौ अत्तृत्वात्स्वादुनामकः।
एतन्नामद्वयं विष्णोः ज्ञात्वा पापात्प्रमुच्यते।'

**इति स्कान्दे।** (**भा.ता.**10.94.32)

'नित्यज्ञानदृशा नित्यं लवकालमपीश्वरः।
पश्येत्तात्कालिकं चैव तस्मादनिमिषो हरिः।'

**इति तन्त्रसारे।**(**भा.ता.**3.10.17)

'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते।
तद्यत्स्वभावः कैवल्यं स भवान् केवलो हरेः।'

**इति स्कान्दे।** (**भा.ता.**6.15.36)

'त्यागात्पूर्वशरीराणां नवानां सञ्चयेन च।
जीवाः इति प्राहुस्तद्वेत्तृत्वाद्धरिं परम्।' इति भागवते।

## (ॐकारवाच्यो विष्णुः)

'ओमित्याक्रियते यस्मादोङ्कारो भगवान् हरिः।
सत्साधुगुणपूर्णत्वात् अस्मान्नान्यो गुणाधिकः।
यतोऽतो सदिति प्रोक्तं विष्ण्वाख्यं परमं पदम्।'

**इति शब्दनिर्णये।** (**गी.ता.**4.19)

'प्रेरणाऽनुमतिः प्रोक्ता क्वचित्सञ्चार उच्यते।
प्रेरकत्वात्तु भगवान् अनुमन्ता प्रकीर्तितः। इति च ।
ब्रह्मरुद्रादयः सर्वे शरीररक्षरणात्क्षराः।
श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः।
चेतनाचेतनस्यास्य राशेः संस्थापकत्वतः।
कूटस्थ आत्मा स ज्ञेयः परमात्मा हरिः स्वयम्।
क्षराक्षरात्मनोर्यस्मादुत्तमः स सदाऽनयोः।

पुरुषोत्तमनामाऽतः प्रसिद्धो लोकवेदयोः।'

**इति नारायणश्रुतिः।** (**गी.ता**.16.17,18)

'ओतमस्मिन्निदं सर्वमिति प्रोक्तः स ओमिति।

तस्मादोमिति यज्ञादीन् प्रवर्तन्ते हि वैदिकाः।

अनोङ्कृतं ह्यासुरं स्याद् यत्तस्मादोङ्कृतावपि।

ओङ्कारार्थहरेः सम्यग् अज्ञानादासुरं भवेत्।' (गी.ता.17.28)

## (केशव-ईश्वर-कर्मादिशब्दाः विष्णावेव)

'हिरण्यगर्भः कः प्रोक्तः ईशशङ्कर एव च।

सृष्ट्यादिना वर्तयति तौ यतः केशवनामवान्।'

**इति हरिवंशे।** (**गी.भा**.2.54)

'समर्थ ईश इत्युक्तस्तद्वरत्वात् त्वमीश्वरः।' (गी.भा.4.6)

'यतः कर्षसि देवेश नियम्य सकलं जगत्।

अतो वदन्ति मुनयः कृष्णं त्वां ब्रह्मवादिनः।'

**इति महाकौर्मे।** (**गी.भा**.5.1)

'कर्मनामा तु भगवान् फलकर्तृत्वतो हरिः।

पातनात्पापनामाऽसौ पुनातेः पुण्यनामवान्।'

**इति भारते।** (**बृह.भा.अ**.5)

'हंनाम अन्यमानत्वाज्जीवस्य समुदाहृतम्।

जीवादन्यो यतो विष्णुरहंनामा ततः स्मृतः।

स्मीति जीवः समुद्दिष्टः स्मीत्यल्पसुखवत्त्वतः।

पूर्णत्वादस्मिनामाऽसौ पूर्णः पूर्णगुणत्वतः।

ब्रह्मस्मीत्युच्यते विष्णुर्बृहत्पूर्णो यतः सदा।

असौ सूर्यगतो विष्णुर्हृतस्थत्वात्प्रकीर्तितः।

अहंनामा जीवगतावित्यहेयत्वहेतुतः।' इति पाद्मे।

'बद्धो बन्धादिसाक्षित्वाद्भिन्नो भिन्नेषु संस्थितः।
निर्दोषाद्वयरूपोऽपि कथ्यते परमेश्वरः।' इति हरिवंशे।

'पञ्चरात्रं च वेदाश्च मूलरामायणं तथा।
पुराणं भागवतं चैव भारतं च निगद्यते।
एतेष्वपि यथा विष्णोराधिक्याप्रतिपादनम्।
तद्भक्तानां च क्रमशः स एवार्थो न चापरः।
अन्यथा दृश्यमानं तु मोहायैव विनिर्दिशेत्।
तस्मात्सर्वेषु शास्त्रेषु विष्णोराधिक्यमेव तु।
क्रमेण च तदीयानां प्रतिपाद्यं न चापरम्।' इति ब्रह्माण्डे।
'अभेदो जगतो विष्णोर्या वाचो ये च हेतवः।

## (मोहजनकेषु विषयेष्वादरो न कार्यः)

'विष्णोर्भक्तिमृते मुक्तिर्जीवाभेदो हरेरपि।
शिवब्रह्मादिसाम्यं च हरेर्मोहार्थमुच्यते।
दैत्यानां मोहनार्थाय विष्णोरन्यसमानता।
हीनता चोच्यते शास्त्रे न तद्ग्राह्यं मनीषिभिः।
तस्मात्सर्वोत्तमं विष्णुं निश्चित्य परमं व्रजेत्।' इति हरिवंशे।

'सोऽद्वयः पुरुषस्तस्मान्न समो नाधिको मतः।'

**इति महासंहितायाम्।** (भा.ता.1.2.11)

## (अप्रसिद्धगुणत्वाद् हरिरनामा)

'अप्रसिद्धेस्तद्गुणानामनामाऽसौ प्रकीर्तितः।

अप्राकृतत्वाद्रूपस्याप्यरूपो स उदीर्यते।'

इति वासुदेवाध्यात्मे। (भा.ता.1.10.23)

'तद्वशत्वादिदिं रूपं हरेर्नैव स्वरूपतः।

यदधीना यस्य सत्ता तत्तादित्येव भण्यते।

विद्यमाने विभेदेऽपि मिथो नित्यं स्वरूपतः।' इति

भविष्यत्पर्वणि।(भा.ता.2.5.2)

'त्वदधीना यतः सत्ता अवरस्यापि केशव।

## (विष्णोः भेदेऽपि तज्जातत्वादिना तदित्यभेदव्यपदेशः)

अतः स्वरूपतः सम्यक् सति भेदेऽपि तद् भवान्।'

इति मात्स्ये।(भा.ता.2.5.6)

'ब्रह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः।

यथावदच्छ्रुतौ तद्वद् जीवो ब्रह्मेति वाग्भवेत्।'

इति ब्राह्मे।(भा.ता.2.5.37)

'सदिति व्यक्तमुद्दिष्टं असदव्यक्तमुच्यते।

गम्यागम्यस्वरूपत्वात् तत्सत्तादि हरेर्यतः।

अतस्मादन्यदेव ह्यनन्य इति भण्यते।' इति च ।

'लोकसिद्धार्थनाम्नः स राहित्यान्नामवर्जितः।

अरूपोऽप्राकृतत्वाच्च सत्वाभावात्तथाऽगुणः।

अकर्माक्लिष्टकारित्वात् नित्यत्वादज एव च।

अलौकिकार्थसन्नाम्नामनन्तत्वाज्जनार्दनः।

अनन्तनामा परमः सुसुखज्ञानवानिति।' इति ब्रह्मतर्के।

'अगुणोऽगुणदेहत्वात्सगुणो गुणधारणात्।

ऐश्वर्यादिगुणत्वाद्वा वासुदेव उदीर्यते।'

**इत्याग्नेये।** (**भा.ता**.10.4.20)

‘सर्वैः क्रियापदैश्चैव सर्वैर्द्रव्यपदैरपि।

सर्वैः गुणपदैश्चैव वाच्य एको हरिः स्वयम्।

युष्मत्पदैः प्रातियोग्यात्तद्यक्तैश्च क्रियापदैः।

अस्मत्पदैनजेतत्वात्क्रियार्थैश्च तदन्वितैः।

परोक्षत्वात्तत्पदैश्च मुख्यवाच्यः स एव तु।’ इति परमश्रुतिः।

‘

‘सूक्ष्मत्वादप्रसिद्धत्वाद्गुणबाहुल्यतस्तथा।

अनिर्देश्यो तथा उक्ताविचिन्त्यौ श्रीश्च माधवः।’

**इति नारदीये।** (**गी.ता**.12.1)

‘त्वदधीनं यतः सर्वम् अतः सर्वो भवानिति।

वदन्ति मुनयः सर्वे न तु सर्वस्वरूपतः॥’ इति पाद्मे। (गी.भा.4.24)

‘स्रष्टा पाता च संहर्ता नियन्ता च प्रकाशिता।

यतः सर्वस्य तेनाहं सर्वोऽसीत्युषिभिस्मृतः॥’

**इति नारदीये।** (**गी.भा**.7.5)

‘अप्रसिद्धेरवाच्यं तद्वाच्यं सर्वागमोक्तितः।

अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम्॥’ इति गारुडे।

‘परमात्मा यतो जीवं मेने सन्तमशक्तितः।

असन्नसौ ततो नित्यं सत्यज्ञानादिको हरिः॥’

**इति आग्नेये।** (**भा.ता**.3.6.1)

‘वर्णस्थो वर्णनामासौ स्वरस्थः स्वरनामकः।

पृथङ्मूलं हरिस्तस्य जगद् वृक्षस्य भूमिवत्।

उत्तमत्वात्तु मूलानां ऊर्ध्वमूलः स्वतः स्मृतः।

नीचास्ततो महदहं बुद्धयो भूतसंयुताः।’ (गी.ता.15.1)

'यः शेते प्रलये विष्णुः शून्यनामा महाधृतिः।

स तु नारायणो नाम नराणामयनत्वतः।' (भा.ता.2.6.41)

'पर्वताः सिकताश्चैव नद्यः कूपाः सरांसि च ।

हविः कपालयूपाद्याः देवता एव सर्वशः।

तत्तन्नामैव नामैषां भिन्नानामभिमानतः।

नामानि तान्यपि हरेः स हि सर्वगुणाधिकः॥

**इति नारदीये।** (**बृह.भा.अ**.3)

## (भारतादिशास्त्रादेव विष्णुर्ज्ञेयः नान्यैर्दुरागमैः)

यथा तु भारते देवो न तथाऽन्येषु केषुचित्।

उच्यते न तथाऽपीशं जानन्त्यज्ञा जनार्दनम्॥

**इति स्कान्दे।** (**भा.ता**.1.4.30)

'भारतान्नाधिकं विष्णोर्महिमावाचकं क्वचित्।

भारतान्न विरागाय भारतान्न विमुक्तये॥' इति पाद्मे। (भा.ता.3.5.12)

'शास्त्रेषु भारतं सारं तत्र नामसहस्रकम्।

वैष्णवं कृष्णगीता च तद्ज्ञानान्मुच्यतेऽञ्जसा।'

**(गी.ता.उपोद्घाते)**

'ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्।

मूलरामायणं चैव पुराणं चैतदात्मकम्।

ये चानुयायिनस्तेषां सर्वे ते च सदागमाः।

दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः।

ज्ञेय एतैः सदा युक्तैर्भक्तिमद्भिः सुनिष्ठितैः।

न च केवलतर्केण नाक्षजेन न केनचित्।

केवलागमविज्ञेयो भक्तैरेव न चान्यथा।'

इति ब्रह्माण्डे। (वि.त.नि)

'नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति।'

इति पिप्पलादशाखायाम्। (वि.त.नि)

## (वेदनित्यत्वमपौरुषेयत्वं च बहुप्रमाणसिद्धम्)

'विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः।

अनादिनित्या सा तच्च विना तां न स गम्यते।'

इति कात्यायनश्रुतिः। (वि.त.नि.)

'नित्ययाऽनित्यया स्तौति' 'वाचा विरूप नित्यया' 'नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः' 'वेदो नित्यो धर्ममूलं' 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेह चाहम्' इति गीतायाम्।

'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम्।

अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरषार्थस्ततोऽतः।

ऋगाद्या न पराविद्या यदा विष्णोर्न वाचकाः।

ता एव परमा विद्या यदा विष्णोस्तु वाचकाः।'

इति परमसंहितायाम्। (आथ.भा.मं.1)

## (सर्वशब्दाभिधो विष्णुः)

'

एष एव सदा पन्थाः भगवान् हरिरीश्वरः।

नित्यश्च प्राप्तिहेतुत्वात् कर्तृत्वात् कर्म मातृतः।

ब्रह्मैव गुणपूर्णत्वात्सत्यं साधुस्वरूपतः।

तेजसा बृंहणादुक्तो एवोत वनस्पतिः।

अन्ये स्थित्वा तृप्तिदत्वातस्माद्यत्वमयीष्यते।

शिलाद्येषु स्थितो विष्णुर्भारदार्व्यादिकारणम्।

नैव चित्तादिकस्यातो वृक्षाद्या उत्तमास्ततः।

विशेषोऽयं पदार्थानां न तु विष्णोः कथञ्चन।

अनिरुद्धादिरूपेण स विष्णुः पञ्चधा स्थितः।

स्तोमः स्तामचितिश्छन्दनगस्त्रेष्वपि पृथक् पृथक्।

एकैकमेव तद्रूपमनिरुद्धादिपञ्चकम्।

प्रस्तावादिष्वपि विभुः पञ्चधैव व्यवस्थितः।

प्रस्तावादीन् पञ्चकृत्वस्तस्मादेव प्रकुर्वते।

पञ्चरूपं तमेवैकं स्तोतुमेव पृथक् पथक्।

तत्र ये स्तोमशब्दाश्च संस्थिता बहुकोटयः।

पृथक् पृथक् तेऽपि विष्णोः प्रादुर्भावान् प्रचक्षते।

सर्वछन्दोऽभिधेयश्च सर्ववेदाभिधस्तथा।

सर्वमुन्यभिधश्चैव सर्ववस्त्वभिधो हरिः।

मोचयित्वा समीपं हि द्रावयेद्वासुदेवकः।

तेनोपद्रवनामाऽसौ निधीयन्ते यतोऽखिलाः।

मुक्ता नारायणे देवे तेनासौ निधनाभिधः।

अकारः प्रथमं नाम विष्णोः सर्वगुणान् ब्रुवन्।

सर्वदोषविरुद्धत्वाद् गुणानामन्यतामपि।

प्रणवश्च तथोङ्कारः प्रथमं नाम चक्रिणः।

## (अकारवाच्यः विष्णोरेकः)

अकारनामा नान्योऽस्ति तमृते पुरुषोत्तमम्।

ब्रह्मरुद्रादिनामानि ब्रह्मादिष्वप्यमुख्यतः।

वर्तन्ते नत्वकारोऽयं वर्तते केशवं विना।

नारायणादिनामानि नृणां नामक्रियास्वपि।

बिहितान्यकारो नैवाऽयं बिहितस्तमृते प्रभुम्।

वायुर्ब्रह्मापि चाकारादेवते तु नामिनौ।

यथा वेदाभिधेयोऽन्यो वेदाख्या देवता परा।

एवं नामाभिमानी तु वायुर्वाच्यो जनार्दनः।

तस्माद् अ इति नामैतद्विष्णोः केवलमेव हि।' इत्यादि ब्रह्मसारे।

'सर्वशब्दान् हरौ नेतुं कस्य देवानृतं बलम्॥

वाय्वन्तास्तारतम्येन विष्णुनामार्थवेदिनः।'

**इत्यर्धनारीनारायणतन्त्रे**

'विरूपाक्षः शिवः सूर्यः सुराचार्यो विनायकः।

पुण्डरीकेक्षणो विष्णुः सहस्राक्षः सुराधिपः।'

**इति स्कान्दे।** (**ऐ.भा.**2.3)

'ज्ञेयो विष्णुर्हृदयमिति हृद्गतत्वात्प्रकीर्तितः।

मन्तृत्वान्मन इत्येव यश्च ज्ञातृस्वरूपतः।

एतत्सन्निहितत्वाच्च पूर्णत्वादिति कीर्तितः।

इतत्वाच्च ततत्वाच्च स इतीनामकेशवः।

गुणानामुच्चयो यस्मात्स च इत्येवशब्दितः।

सम्यक् ज्ञानस्वरूपत्वात्सद्ज्ञानमिति कीर्तितः।

आततज्ञानरूपत्वादज्ञानं भगवान् हरिः।

विविधज्ञानरूपत्वाद् विज्ञानमिति कीर्तितः।

प्रकृष्टात्मगुणज्ञानरूपं प्रज्ञानमुच्यते।

अपि स्मृतित्वान्मेधा स दृष्टिर्दर्शनरूपतः।

धृतिर्धारणरूपत्वामतिर्माश्रुततत्त्वतः।

सर्वदेशेषु कालेषु स्वरूपेषु च सर्वशः।

समं रमत इत्येव स्मृतिर्नाम जनार्दनः।

सर्वस्य क्लृप्तिकर्तृत्वात्सकल्प इति गीयते।

क्रतुः सर्वस्य कर्तृत्वादसुरव्यसनाद्धरिः।

अमेयानन्दरूपत्वात्काम इत्यभिधीयते।

अवशः स स्वतन्त्रत्वात् त्रयोविंशतिनामकम्।

यो वेदैवं हरिं सम्यक् मुच्यतेऽखिलसंसृतेः।

**इत्यैतरेयसंहितायाम्।** (ऐ.भा.2.5)

'सन्धाननामा सन्धानकर्तृत्वात्पुरुषोत्तमः।

अन्तरेवेक्षणाच्चैव सोऽन्तरिक्षोऽन्तरिक्षगः।

पृथिवी पृथिवीसंस्थः प्रथितत्वाज्जनार्दनः।

मुख्यार्थत्वात्सर्वनाम्नां सर्ववेदाभिधो हरिः।

गान्धारयंश्च गन्धर्वो गन्धर्वेषु व्यवस्थितः ।

माननान्मानुषो नाम मानुषेषु स्थितो हरिः।

पालनात्पितृनामाऽसौ पितृष्वेव व्यवस्थितेः।' (ऐ.भा.2.7)

'पूर्णत्वादात्मनामाऽसौ प्रतिमावादमुष्य तु।

सङ्घात आत्मशब्दोक्तो ह्यस्थिरश्चास्थिनामकः।

अस्थिस्थितो हरिः स्पर्शसंस्थितः स्पर्शनामकः।

स्पर्शहेतुत्वतः स्पर्शनामा स भगवान् हरिः।

मज्जासंस्थः स मज्जास्थो मदं जनयतीति ह।

स एव स्वरसंस्थश्च स्वराख्यः स्वरतेः प्रभुः।

प्रमाणं सारयेद् यस्मान्मांसाख्यो मांससंस्थितः।

लोहिताख्यो रक्तवर्णो लोहितस्थो जनार्दनः।

**इत्यैतरेसंहितायाम्।** (ऐ.भा.3.8)

'अ इत्याक्रियते यस्माद् वासुदेवो ह्यनामकः।

स चेतनतमत्वाद्धिचित्रमित्यभिधीयते।

स एव पितृसंस्थस्तु पातृत्वात्पितृनामकः।

स एव पुत्रसंस्थश्च पुत्रनामा जनार्दनः।

वर्षणाद्वर्षमुद्दिष्टो बलनाद्बलिनामकः।

तारणात्तृणनामाऽसावित्याद्येकोऽभिधीयते।'

## (वायोरसङ्कुचितसर्वशब्दवाच्यत्वं नास्ति)

'सर्वनामाऽपि भगवान् सर्वशक्तिश्च सर्ववित्।

तस्यैव मुख्यनामानि समाकृष्येतरेष्वपि।

उपचारात्प्रवर्तन्ते व्यवहाराप्रसिद्धये।

तथैव सर्वनामानि प्रवर्तन्ते च मारुते।

न तावन्मुख्यवृत्त्यैव मुख्यतोऽन्यव्यपेक्षया।

मुख्यतः सर्वनामा तु विष्णुरेको न चापरः।

तस्मात्प्राणादिशब्दाश्च विष्णावेव हि मुख्यतः।

अन्यव्यपेक्षया वायौ मुख्यवृत्तिर्विधीयते।' (महै.भा.अ1.प्र.2)

अनन्तनामवत्त्वाच्च सोऽनन्तगुण ईरितः।

पृथङ्नामानि यस्मात्तद्गुणानेव प्रचक्षते।' इत्यादि ब्रह्माण्डे। (बृह.भा.अ.3)

'सर्वनामाऽहमस्म्येक इति ज्ञानं ममोत्तमम्।

यस्मात्सर्वगुणत्वं स्यात्सर्वनामत्व एव तु।

न हि दोषाभिधायीनि विष्णोर्नामानि कानिचित्।

अदोषत्वान्महाविष्णोर्न सामान्यवचांस्यपि।

सर्वोत्तमगुणत्वत्वात्सदा नारायणस्य हि।

सर्वोत्तमगुणानेव नामान्याचक्षते हरेः।

मिनोति त्रायते चेति मित्रमित्यभिधीयते।

तस्माद्यो यं विजानाति स मित्रं तस्य नान्यथा।'

**इति भारते।** (ऐ.भा.2.1.)

'ता वा एताः सर्वाः ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्याद्' इति सर्वनामाभिधेयत्वं भगवत उक्तं न च सर्वस्वरूपत्वम्।

'स्रष्टृत्वाच्चैव पातृत्वात् नियमस्य प्रकाशनात्।

सर्वत्वमुक्तं विष्णोस्तु न तु सर्वस्वरूपतः।'

इति भारतवचनात्। (ऐ.भा.2.1)

उक्तं च भागवते व्यासेन -

‘नानार्थकः स्वरो वाऽपि वर्णो वा कुत्रचिद् भवेत्।
पदं वाक्यं कुतश्च स्यान्नाल्पार्थमपि कुत्रचित्।
उच्चारणाद् व्यर्थमपि नास्ति किञ्चित्स्वरादिकम्।
महार्थमेव सर्वं हि वेदे व वैदिकेऽपि वा।’ इति।

‘यद्यप्यस्य हरेः सर्वरूपाण्यप्यखिलैर्गुणैः।
पूर्णान्यथापि चैकैकं रूपेषु स पृथक् गुणैः।
व्यवहारान् पृथग् देवः करोतीव हि लीलया।
तस्मात् पृथगिवास्येति नाम विष्णोः परात्मनः।
वर्षणात्तु निधानात्तु स एवौषधिनामकः।
वननीयपतित्वाच्च स सौवर्णसन्धानकर्मणि।
घर्षणात्सर्वलोकस्य नृसिंहो घर्ष उच्यते।’

इत्यृग्वेदसंहितायाम्।

‘सर्वे वेदा युक्तयः सुप्रमाणाः ब्राह्मं ज्ञानं परमं त्वेकमेव।
प्रकाशयन्ते न विरोधः कुतश्चिद्वेदेषु सर्वेषु तथेतिहासे॥’

इति पैङ्गिश्रुतिः

## (ग्रन्थोपसंहारः)

‘सिद्धं सर्वोत्तमत्वं जगति परमसत्यत्वमद्धा भेदो
ब्रह्मादेर्वीशदासत्वमपि तरतमत्वं तथा मौक्तिकं हि।
निर्वाणे नैजसौख्यं निरुपधिकपरस्नेहसाध्यत्वमस्मिन्
अक्षादेर्मानता वा निखिलनिगमतात्पर्यगम्यत्वमीशे॥

पूर्वोत्तरविरुद्धा मे वागेषास्तु सतां मुदे।

पुनरुक्ताप्यथाऽस्पष्टा स्वार्भकस्य वचो यथा॥

काम्भालूरुकुलाम्भोधौ कामाक्षीगर्भजन्मना।
प्रमाणानां सङ्ग्रहोऽयं कृतः केशवतुष्टये॥

प्रमाणनवरत्नानां मालिका हृदयङ्गमा।
विदुषामस्तु सुदृशामतीव सुमनोरमा॥'

॥ इति श्रीमत्कम्भालूरु सर्वज्ञचूडामणिबट्टारकपौत्रेण नरहरिभट्टारकपुत्रेण पिन्ननरहरिणा प्रपञ्चितः
नवरत्नमालिकाव्याख्यानरूपः प्रमाणसङ्ग्रहः सम्पूर्णः॥

**श्री कृष्णार्पणमस्तु**